Shri Raghunatha Temple MSS. Library,
JAMMU

No. २४०/घ

Title पदार्थदीपः

Author लक्ष्मीदत्तः

Extent २१ पत्र Age

Subject व्याकरण

पदार्थदीपकम्

१४०

२१ पत्राणि

श्लोकसंख्या ६८०

श्री॰
दु॰ गौ॰
श॰ प॰
टी॰
१

ॐ श्रीगणेशाय नमः ॐ शाण्डिल्यस्य कुले जातं देवीदत्तं तपोनिधिं पितुः पितामहं वंदे विख्यातं ब्रह्मतेजसा १ पिता
महमहं वंदे रामसेवकनामकम् विख्यातयोर्म्मां विख्यातं यशोभिर्भुवनांतरे २ वंदे श्रीमन्महाचार्य्यं पितरं रुद्रसंज्ञदेवतं
कृत्स्नमिदं इति ख्यातममयाममतं श्रुतम् ३ लक्ष्मीदत्तो हरिं भजतीत्यत्र लक्ष्मीदत्तेति नामस्व हरिं शहम् भजधात्वालिङि॰
मेवं षष्ठ्याः तत्र जातिगुणक्रियासंज्ञानुपशहृतिनिमित्तभेदाच्छब्दप्रवृत्तेः प्रामाणिकैश्चतुर्विधत्वस्वीकारेपि जात्यादिश्रु
कृतायाः संज्ञायाः पातञ्जलमते आरोपेण प्रवृत्ततया लक्ष्मीदत्तशब्दस्य क्रियाशब्दत्वान्निवारोपितत्वक्रियाविशिष्टोर्थः नन्वा
रोपितजात्यादिनिमित्तकस्यैव संज्ञात्वेन तद्रूपीति प्रवादासंगतिरिति चेन्न त्र्यीपक्षस्यापि सिद्धान्तसिद्धत्वात् नन्व
न्वर्थसंज्ञास्थले आरोपितजात्यादेर्निमित्तत्वेपि भवेदिति डित्थादिशब्देषु यवार्थरहितेषु केवलसंज्ञायास्स्वीकारेण निर्वाह
इति चेन्न तत्रापि जातिस्वीकारेण दोषात् ननु तत्र ज्ञानस्याभावाज्जातिस्वीकारेन मानेतापि फलमिति चेन्न तत्राप्येव
स्याभेदेनानन्त्यस्य सत्त्वात् श्रमयोर्यं डित्थपदवाच्य इति संकेतकाले इदमानदेशकालविशिष्टस्यैवोपास्थितत्वात् देशान्तरे
कालान्तरे च डित्थपदवाच्यत्वानापत्तेः देशकालादिविशिष्ट्यास्वीकारे ऽयं बाल इति पूर्वे ज्ञाते तारुण्येपि बालत्वबोधः
स्यात् ननु गुडशब्दान्मधुरत्वप्रकारकबोधानुभवात् तत्प्रकारकशाब्दबोधे प्रति तत्प्रकारकवृत्तिज्ञानसहेतुतायाः ४ १

क्लृप्तत्वादिदमस्तु देशकालविशिष्टे शक्तेः स्वीकारान्न दिशि शब्दबोधेन मानमिति चेन्न बुद्धिविशेषस्यैव विषयतोपलक्षितत्तद्धर्मावच्छिन्ने
तदादीनां शक्तिस्वीकाराद्देशकालवैशिष्ट्यस्यापि बुद्धिविषयत्वसत्त्वेनादोषात् बुद्धिविषयत्वस्योपलक्षणत्वे यत्तिन्नद्धर्माणां श
क्यतावच्छेदकत्वस्वीकारात् नन्वेवं जातिस्वीकारे यितद्देशकालयोरेव जात्यनुभवाद्देशान्तरे कालान्तरे डित्थत्वजातेरभावाद्देशा
न्तरे कालान्तरे च बोधो न स्यात् जातिस्वीकारस्यानर्थकः स्यात् स्यान्मते तदादिशब्देभ्योऽपि देशान्तरे कालान्तरे च बोधाभावः ह
न्तिज्ञानकाले एव तदस्तित्वासेन देशकालविशिष्टस्यैवानुभवादिति चेन्न जातेः प्रकारत्वेन प्रकारे प्रकारान्तरास्वीकारेण प्र
कारिण्येवान्वयस्वीकारेण जातावन्वयाभावात् वस्तुतो शक्यतावच्छेदकातिरिक्तावच्छिन्नविशेष्यताशाली जातिप्रकारक
एव शाब्दबोधः शक्यतावच्छेदिका जातिरेव सर्वत्र सर्वेदानुस्यूतत्वात् सञ्ज्ञादयस्ते संज्ञिन एव मयूखतातत्त्वे च देशकालाद्य
नन्वयः स्यात् तेच्छाशब्दस्वीकारे शब्दार्थसम्बन्धनिमित्तताऽपि हीयेत जातिस्वीकारे न्नबटादिशब्दे हद्व्यवहारस्येव प्रकाशकत्वमात्रे पि
त्वादेः षत्वरे च तरत्वरे वा नाम कृष्यादिमादिस्त्रत्वाव सेच्छाशब्दाभाव एव बोध्यते पाणिनीयं जातिसञ्ज्ञाप्रयुक्तकार्यवैलक्ष
ण्यन्तु शास्त्रप्रक्रियामात्रोपयोगि टिहृत्वादिजातिवत् आकाशत्वादेरपि जातित्वमिष्टमेव तथारोपितमनारोपितं वोभयम
देतत् स्वदादिशब्दानां तु न सञ्ज्ञात्वं सर्वव्यक्तिबोधाय जातिपुरस्कारेणैव सञ्ज्ञात्वस्य वक्तव्यत्वात् या जातिशब्दस्तेष्वेव लाघवात्
तथा च न पृथक् सञ्ज्ञाविषयकः कार्यकारणभावः क्वचित्कौवेत्यादिनापि तादृशजातिकल्पनेऽप्येव साधुत्वं बोध्यते ॥

श्रीः
दुर्गोः
कप
दी.
२

स्तुवासत्ताश्रयत्वयोगेववत्तत्वयोर्यतस्तस्यापिस्वीकारात् ननुकीदृशीसाजातिः प्रत्यक्षेनानुगतप्रत्ययमानत्वात् जवालति
सेतिवक्तुंशक्यते नन्वत्रापिद्रव्येषुसमानाकारप्रत्ययभावेनद्रव्यत्वस्यजातित्वाजायतेः जात्याकृतिव्यक्तयः पदार्थ इति गौतम
सूत्रेजातेः पृथगुपादानाद्व्यवच्छेदपरिमाणप्रतिविक्तेकृतेरनुभवाच्च अवयवसंस्थानस्यापिनजातित्वम् तद्विशिष्टस्यैवद्रव्य
त्वेनानुभवादितिविवरणे उपादानैर्येनवस्तुनः पदार्थानामेकत्वेपिद्रव्यत्वमितितुव्याख्यानमत्रतावद्ब्रह्मसमवेतजातिः न
चाविवादायएवतदोलम्बनस्यमितिवाच्यम् अविषयायाः पदार्थान्तरमात्रकल्पकत्वात् ब्रह्मसत्तापाद्वमप्युच्यतादिशब्द
वाच्यत्वात् सभायाजातित्वमविद्यापरिकल्पितव्यक्तित्वयपदार्थान्तरस्यासत्त्वेहरिणाप्युक्तम्· सम्बन्धिभेदात्सैवः अ
सत्यावक्तयोमता इत्यादिना ननुब्रह्मसत्तायाजातित्वमयुक्तंजातेरनित्यत्वात्स्वयमेवव्यवहारनिर्वाहस्तन्निर्वाहाय
मेवच नानाविधकर्मकल्पनातयावयनिर्वाहार्थंधर्माः कल्प्यतांस्तनित्याएव· यथापारमार्थिकेब्रह्मणि घटत्वादयः
स्तुमाः घटत्वादिलेवहितेषामानित्यत्वेननब्रह्मत्वेनएवंचयद्शादमस्यासत्तनतन्देवसाक्षात्सत्यत्वम् किंच सत्तायाए
व जातित्वेतस्याएकत्वाद्घटपटत्वपरत्वादीनामेकत्वादनिर्णयप्रसङ्गात् घटपटादिनातस्याभेदस्तनकतेशंकाः घटत्वनि
र्णयेघटनिर्णयोघटनिर्णयेघटत्वनिर्णयइत्यन्योन्याश्रयात्तस्मिन्भ्रमितेनापिनसर्वघटानुगमः तस्मिन्त्वत्वान्
स्यापिजातित्वानाधीनत्वात्स्वरूपसत्ताभेदेनानुगमेनसत्तास्वीकारोफलप्रसङ्गात् किंच सतोविद्यमानस्यभावस्य २

त्वासायं च ब्राह्मणो वध्यादेवोत्थितेन वचनेन सर्वव्यक्त्यनुगमः संभवति किंच समवायाजातित्वेन बोधः स्यात् घटत्वादिना किंच ग्र
फलोपि जातिस्वीकारः लोकव्यवहारमभिवोढार्थमेव तत्कल्पनाहेतुव्यवहारस्य च श्यपतोपि लौकिकानामयं घट इत्येव ज्ञाने भव
ति न तु घटत्वविशिष्ट इति किंच शक्तिग्राहकशिरोमणिर्व्यवहारो व्यक्तिमेवावगमयति व्यक्त्यंशे शक्यतावच्छेदकाति
रिक्तेदिकथनमपि लौकिकानामननुभूतमेव किंच तस्याप्येकत्वे एकव्यक्तिसमवेतत्वे व्यक्त्यन्तरे समवेतत्वं न स्यात् सर्वा
नुभवसिद्धस्य च घटस्यैकत्र समवेतस्यान्यसमवायादर्शनात् अनेकत्वे तत्कल्पनावैयर्थ्यं किंच अतीतानागतव्यक्ति
निष्ठायास्तस्याः कावस्थानम् न च सकलव्यक्तिबोधो न स्यादिति वाच्यम् विनिगमनाविरहेण सादृश्यमूलकलक्षणा
यात्तन्मूलकेतरत्वप्रत्यभिज्ञानेन वा बोधसंभवात् अथवा पुनः पुनर्व्यवहारेणैतत्रयव्यवहारएव शक्यतावच्छेदक
अथवाकृतिस्तु रत्नरूपा शक्तिर्यथापि ह्यमयो गोरियं त्वकृतेरेव दर्शनात् अस्य स्याद्यं घट इत्यादवती च घटाकृतिमत्वादि स्व
मित्यात्मकज्ञानमस्तु किंच व्यक्त्यंशे शक्यतावच्छेदकेत्वादिकथनेपि शक्तिग्रहकाले सर्वव्यक्तिप्रत्यक्षाभावात्सर्वव्यक्तिवि
षयकं ज्ञानं न स्यादेवं सामान्यलक्षणाप्रत्यासत्तिस्त्वं न संभवति व्यक्तिद्वारा संयुक्तसमवायेन भासितप्रत्यक्षस्यैवोपाधि
केस्वीकारात् किंच परंपरासम्बन्धेन प्रत्यक्षस्यादेवव्यक्तिसम्बन्धवतः कुलालस्यापि प्रत्यक्षतापत्तेः न च शक्तिसम्बन्धेन
स्तत्रविद्यमानत्वेऽप्यप्रत्यक्षं लौकिकप्रत्यक्ष इति वाच्यम् इयं धियाद्यत्र ज्ञाने जलेपि इदं तत्संसर्गात्तस्यापि प्रत्यक्षतापत्तेः सत्या

श्रीः दु॰ गं॰ वा॰ य॰ दी॰ ३

सत्तेः प्रकारतयाभासमानत्वस्यान्यत्रादृष्टत्वादिति मैवं तथाकेस्य नच सामान्यलक्षणायाः स्वीकारे धूमो वह्निव्याप्यो
नवेति संशयानुभव उच्छिद्येतेति वाच्यम् धूमत्वसामान्यलक्षणया सकलधूमे वह्निव्याप्यत्वनिश्चयेऽप्यन्यत्रैव संश
योच्छेदापत्तेः नच प्रमासत्तेः प्रकारत्वेनोच्यते किंतु संयुक्तसमवेतसमवायित्वसम्बन्धेन देशान्तरीयघटप्रत्यक्षमुच्यत इति वा
च्यम् चक्षुःसंयुक्तसमवेतसमवायिसमवेतत्वसम्बन्धेन नीलत्वादिनापि प्रत्यक्षापत्तेः नचोपात्तसमवायित्वमेव इष्यते
नीलादिष्वनोपान्नाश इति वाच्यम् नीलस्वरूपवानिति प्रत्यक्षे तद्रूपस्योपात्तत्वात्तत्सम्बन्धेन घटोऽपि रूपवत्तज्ञानापत्तेः नच
यत्र वैशिष्ट्येन ज्ञानं तत्रैव तया कल्प्यते रूपवानित्यत्र तु रूपसम्बन्धस्यैव वैशिष्ट्यं प्रतीयत इति वाच्यम् प्रत्यक्षशाब्दयोर्वै
षम्यात् सर्वोक्तद्वयविषयकदोषाच्च नच सर्वेषां शब्दानां व्यक्तिमात्रवाच्यत्वे गौः शुक्लश्चलो डित्थ इत्येतेषां सह प्रयोगा
नुपपत्तिरिति वाच्यम् गोशब्देन व्यक्तिमात्रबोधेऽपि तद्रूपेण बोधाभावे सर्वेषां प्रयोगस्यावश्यकत्वात् किंच जातिस्वीका
रे तत्र ब्राह्मणोऽहमादिमादौ जातौ संख्यान्वयः ब्राह्मणाः इत्यत्र न स्यादिति वैषम्यं चेदेवम् अस्माकं तत्राहत्या सर्वव्यक्तिविषय
कत्वम् किंच जातिप्राधान्ये स्वीते भङ्गसंकटं वा स्यात् किंच जातिस्वीकारे जात्याकृतिशक्त्यनुभवस्तादृशवैशिष्ट्यस्य देशा
न्तरीयपदार्थ इति सत्वरीत्याकृतिशब्दवाच्यवैशिष्ट्ये शक्तिस्वीकारात् यादृशवैशिष्ट्यस्य शक्त्यनुभवस्तादृशवैशिष्ट्यस्य
देशान्तरीयसत्त्वाभावाद्दोषो न स्यात् किंच विशिष्टशक्तिस्वीकारे घटत्वादेः शक्यतावच्छेदकत्वं न स्यात् जातिशब्देनैवया ३

इत्येतत्पदविवहिर्भूतां जातिं टघ्वाव्यक्तौ शक्तः प्रवर्तनं तदेव जातिनिमित्तत्वेनैव न हि शक्यस्यानिमित्तत्वं संभवति न च श-
क्यैकदेशप्रकारत्वमेव शक्यतावच्छेदकत्वमिति वाच्यम् रूपवानित्यत्र रूपत्वस्यापि शक्यतावच्छेदकतापत्तेः जात्याख्याया
मित्यादौ तस्यापि प्रक्रियानिर्वाहार्थं कल्पितत्वमेव तस्माद्व्यक्तिरेव पदार्थ इति चेद् उच्यते व्यज्यते यासा व्यक्तिरिति व्युत्पादित
या शक्तिशब्दवाच्यस्य पदार्थत्वे स्वीकृते व्यज्यते यया सा जातिरिति व्युत्पादितया जातेरस्वीकारोऽनुचित एव न च व्यज्यते यया
व्यञ्जनमित्यर्थो वा सम्भवति घटत्वस्य व्यक्तेरदर्शनात् भावार्थत्वापत्तेश्च घटभावः ब्रह्मैव तत्तद्रूपेण भासते ब्रह्मणः
व्यक्तय एव कल्पितास्तथा च यथा ब्रह्मसत्तया घटादिरभिव्यज्यते सा जातिः या घटरूपेव सत्ता या घट इति शक्तिज्ञानका
ले प्रत्यक्षत्वेन तस्या एव देशान्तरेऽपि सत्तात्त्वापि व्यवहारः एवं च सत्तायामेव भावाज्जात्यतिरिक्तव्यक्तेरननुभवादप्र
त्येकं शक्यतावच्छेदकातिरिक्ता न व्यक्तिरित्यादिस्सामान्यलक्षणप्रत्यासत्त्यङ्गीकारोऽपि विफलमेव ब्रह्मसत्तायां बुद्धिक
ल्पितभेदान्न घटत्वपटत्वादीनामैक्यम् बोद्धभेदानङ्गीकारे व्यक्तीनामप्यभेदप्रसङ्ग उपाधेरनैक्यात् ब्रह्मणो यथा विषमानता
तथैव च घटपटादिव्यवहार इति तस्या घटत्वादिरूपत्वम् न च तस्याः कस्यांचिद्व्यक्तौ समवेतत्वम् तदनतिरिक्तत्वाद्व्यक्तेः
अतीतानागतव्यक्तेरपि तस्याः सर्वत्र सत्त्वात्क्वचित्कारणवशाभ्यानम् संख्यान्वयश्च कुत्रचिन्मुख्या या जातौ कुत्रचिदा
रोपिता यां व्यक्तौ लिङ्गान्तु शब्दनिष्ठमेव न च जातिसंख्याकारकाणामर्थनिष्ठत्वेन लिङ्गस्यापि अनिष्ठत्वमेवोचितमिति

श्री॰ दुर्गा॰ वृ॰प॰ टी॰ ४

वाच्यम् सत्वरजस्तमश्शब्दानां नपुंसकत्वानापत्तेः एकैकगुणेषु गुणत्रयसाम्याभावात् किंच पुंस्त्वशब्देन पुंसकत्वेन स्या-
त् सत्वोपचयरूपे पुंस्त्वपदार्थे साम्यस्यासंभवात् किंच शब्दशब्दस्य पुंस्त्वाभिधायेषु सर्वेषु शब्देषु सत्वोपचयस्वीकारेण ज्ञाना-
दिशब्देषु साम्यादिकं न स्यात् किंच घटद्रव्यं व्यक्तिरित्यार्थपौरेकेन प्रतीतेरेकस्मिन्नेव युगपद्विरुद्धलिंगद्वयकल्पनमयुक्तं
स्यात् न चार्थभेदाच्छब्दभेद इव शब्दार्थभेदादर्थभेदः कल्प्यत इति वाच्यम् शब्दभेदस्योच्चारणाभिव्यक्तिव्यक्तिभेदात्सत्वे-
पि अर्थे जातिव्यक्त्युभयभेदाभावात् नवोच्चारितानां शब्दानामनित्यत्वात्तदभिप्राये एकस्मिन्नेव स्फोटके कथं विरुद्धलि-
ङ्गस्थितिरिति वाच्यम् एकस्यैव विरुद्धनानाधर्मविशिष्टबोधकत्ववन्नानालिङ्गविशिष्टत्वस्यापि संभवात् किंच अनुकार्या-
नुकरणयोर्भेदः अनुकार्यस्यार्थत्वाच्च वाच्यत्वे लिङ्गाभावेन न तदनुकरणे प्रतिनेत्वादावाऽसोनेत्वादीनां प्रवृत्तिर्न स्यात् वै-
शिष्ट्यमपि व्यक्तिवदारोपितमेव घटत्वपदवाच्यत्वविशिष्ट इत्यादिव्यवहारः स्याद्व्यक्त्वादेवावच्छेदकत्वसंभावायाश्चस्याः घस्वी-
कारे देशान्तरे बोधो न स्यात् विनिगमनाविरहस्तु गायन्त्वैषामुपस्थितावेव प्रयोजनं विना लक्षणाया असंभवात्सर्वे
व्यवहारस्य शक्तेरेव नियामकत्वाच्च व्यवहारोऽपि शक्तिमेवावगमयति आकृतिस्वीकारेणापि न निर्वाहः रसगन्धादा-
वाकृतेरभावात् दृष्टान्ताभावादनुमानमपि न संभवति पिष्टमयी गौरित्यत्रापि आकृत्या जात्यारोपः घटादिप्रसक्तेव
जातिव्यक्त्योरेकमेव प्रत्यक्षं संयुक्तसमवायेन प्रत्यक्षत्वान्नैयायिकानां कणादप्रसादलब्धदिव्यवत्त्वगम्यमेव बादरायणम् ८

तेसमवायस्यपदार्थत्वाभावाच्च नत्वाकृतिपदार्थैकस्यद्रव्यंनपदार्थ इतिभगवन्मतेऽगलिविवनात्वोभयोरेकरूपत्वेनपदार्थत्वम
स्यानेत्येपिहिभावनामितिभट्टपादोक्तेर्वचनयुक्तम् स्नानकालेकाकस्यदृष्टविद्यमानत्वादुपलक्षणत्वसंभवेपिव्यक्तिमाज्य
क्तिवादिमते जातस्यत्वाससत्वेनोपलक्षणत्वासंभवात् नचोपलक्षणमित्यस्यायमर्थः शक्यप्रविष्टामपिजातिंदृष्ट्वाशाब्दः
प्रवर्तते प्रकारणेनापिकारणत्वेनापिच्छेदकत्वंवदत्शक्यस्यापिशक्यतावच्छेदकत्वमितिवाच्यम् व्यवहारान्तर्हेवशाब्दप्रतीतिः
स्तानात्मतेरूपयोगाभावात् किंच घटपदस्यतत्कालेद्रव्यत्वस्यापिपतत्वात्तस्यापुपलक्षणत्वेस्यात् किंचसंयुक्तसमवाये
नतस्यांप्रत्यक्षेतत्रजातेर्विशेषणत्वात्घटत्वविशिष्टइत्यादिव्यवहारउच्छिद्येत् किंच व्यक्तिसंबन्धायाःप्रत्यक्षेसम्बन्धान्तरव्याप्ति
मात्रग्रहणमप्रामाणिकंस्यात् किंचप्रत्यक्षशक्तिकल्पनयोस्तत्त्वसोविततत्वाच्छक्तिरप्रमाणैवस्यात् नचैवघटद्वयंव्यक्तः
सेयुक्तेनतदसाधारणधर्मसंबंधोयस्मिन्नत्वादुपलक्षणत्वत्वद्रव्यत्वादेरितिवाच्यम् घटत्वस्यव्यक्त्यन्तरेपिसत्त्वादसाधारण
त्वाभावात् तस्मात्जात्यन्तर्तिदिक्क्षाव्यक्तयः प्रत्येषांतु शक्यतावच्छेदकत्वादिनानुगतप्रभीत्याचप्रतीयते इवेस्त्वनुगतप्रती
तेरभावादवच्छेदकत्वंचैवघटादिष्वनुगतप्रतीतिसत्त्वात्तचैवनचगुणक्रियावत्त्वमेवद्रव्यत्वमस्त्वितिवाच्यम् गुणादिमत्त्व
स्यापिकिंचिदवच्छेदेनैवकल्पनीयत्वात् अन्यथावत्त्वेनतदवच्छेदेगुणादेरपिगुणादिमत्त्वप्रसङ्गात् स्वरूपेकत्व
योनकः पयपिनदागमेहीनिन्यायेनसंख्यायाः प्रत्ययार्थत्वमेवयुक्तम् तथापिवारोत्पादौप्रत्ययेविनापिसंख्याया :

श्री॰
दुर्गा॰
व॰य॰
टी॰
५

प्रतीतेः प्रमेयानाम्नोतिकत्वमेव हरिशब्दस्य सर्वोत्कृष्टतया संसारहारिणि शक्तिः अमृतद्वितीयातेन फलनिरूपिताश्रयता विशिष्टवाचकः एकवचनत्वे नैकत्वपानकः नन्वाश्रयत्वेन बोधायामाश्रयत्वमेव वाच्यमस्तु निरूपकाकाङ्क्षायामाश्रयता यामेवाश्रयतायामाश्रयेत्वस्य बहुत्वावन्वय इति गौरवं वे तिचेन्न आश्रयतायां शक्ताभावाश्रयेत्वराहृत्तित्वसत्याश्रयमात्रवृ त्तित्वनूपाश्रयत्वस्य शक्यतावच्छेदकत्वे गौरवात् नन्वाश्रयानामननुगमार्थमाश्रयत्वकल्पनेपि आश्रयत्वस्यैकान्त्वतदनुग मार्थं धर्मापेक्षेति चेन्न आश्रयतायास्तत्तदाश्रयभेदभिन्नाया अननुगमार्थं वच्छेदककल्पनाया आवश्यकत्वात् नन्वाश्र यतायानभेदः किन्तु निरूपकस्यैव अतएव भवतामाश्रयतायाजातित्वम् किंच आश्रयत्वत्वेनाश्रयत्वानुगमेह विभज तीत्यादौ सर्वाश्रयतायाहरौ प्रतीत्यापत्तिरिति चेन्न आश्रयतायावस्तुत्वेनावाच्यतापत्तेः कल्पनावश्यकत्वात् न च घटादिवि शिष्टेभ्यो घटत्वादिविशिष्टबोधे प्रकारांशे निष्प्रकारकवदुपस्थितविषयत्वमानमिति वाच्यम् प्रकारतत्प्रकारित्वानतिरिक्तप्रकार कबोधस्यास्वीकारात् घटत्वादेश्च प्रकारतयैवोपस्थितेः घटत्वमित्यादिस्थलेपि च अपि किं तु निर्विशेष्यकत्वयैव न च घटत्ववा न्घट इत्यादावनन्वय इति वाच्यम् सत्यमित्यानेलक्षणास्वीकारात् ताभ्याम् तयोश्शब्दान्तरत्वाच्च न च घटत्ववद्घटत्वमि त्यस्यापि स्यादिति वाच्यम् सांसर्गिकविषयताकल्पनात् न च व प्रतीतेरेवमानत्वात् एतेन सांसर्गिकविषयतायामा नाभावस्तयास्तम् नचैवमाश्रयविशिष्टाश्रयतायावाच्यत्वमस्त्वाश्रयताशब्दस्य वेति वाच्यम् [illegible] प्रसीत गौरवापत्तेः आ

अयताशक्यादेस्तत्तथैव शक्तेः त्वमताद्गौरवन्दोषावहम् अत्रैतत्तिरिक्तत्वात्स्यात् नन्वाश्रीयतेयस्य आश्रय इति व्युत्पे·
त्तायाशब्दत्वादाश्रयत्वस्यजातित्वकथनमयुक्तमितिचेन्न याचकत्वादेरपिजातित्वात् अन्यथादेवदत्तादिनायविक्रियास
म्बन्धसाधनेसर्वदासम्बन्धभानेस्यात् जातित्वस्वीकारेतुक्रियासम्बन्धयद्यपिनिरूपकताभावाहङ्कव्यवहारज्ञानाभावाद्यदादि
शब्देनेवनतस्याभानम् अतएवजातिपदेसद्रूपसत्त्वप्रमाणाख्यानेयाचकादित्वादिसिद्धिः अतएवजातिरेववेत्युक्तेभरतेन
स्वनिरूपकत्वस्वीकारस्त्वसंभवेव अतएवाश्रयत्वस्यफलत्वेनापिनजातित्वम् मतद्रूपेणानुपादानाच्चजातौजातिस्वी·
कारस्त्वसम्मतएव निरूपकताबाहुल्येऽपिशक्यतावच्छेदकत्वस्यैववा नातोवैलक्षण्यम् ननुएवमानइत्यत्रापिजातिस्वी
कारेवर्तमानत्वानन्वय इतिचेन्ननिरूपकेन्वयस्वीकारेणादोषात् जलयदशक्यतावच्छेदकतयाजलत्वस्यैवद्वितीयाश·
क्यतावच्छेदकतयाप्याश्रयत्वस्यशक्यतावच्छेदकत्वेनजातित्वविरमात् नचलेजेपदस्यैवनस्यात्त्रेणाकस्यापिद्वितीयावाच्य
त्वमितिनतदवच्छेदकतयाजातिसिद्धिरितिवाच्यम् तस्यापिविभक्तिसहकृतस्यैवार्थवत्वात् प्रातिपदिकत्वादिकंतुलौकि
कार्थवत्वानपेक्षमिति अतएवप्रत्ययइतिचरितार्थम् मास्त्वेवाश्रयत्वेजातिः आश्रयशब्दस्यापिशक्यतावच्छेदकसंभवात्
तथावतच्छेदत्वे नैवोपस्थितिरितिनगौरवसंभावनापि युक्तेवैतत् अन्यथाश्रयत्वेनेवद्वितीयात्वेनापिबोधः स्यात् अनति
रूपिताश्रयस्येतनभानम् भक्तिरूपकस्यफलस्यसत्वात् तन्मताषमिचारभावादवच्छेदककल्पनायाअनर्थकत्वाच्च सं

श्री॰ दु॰ गौ॰ व॰ प॰ टी॰ ९

6

सर्गमर्यादयातत्त्वाश्रयमानम् नामार्थधात्वर्थयोर्नामार्थयोश्च विभक्त्यर्थमद्वारीकृत्याभेदान्वयस्याङ्गीकारात् अन्यथा कर्म
तासंसर्गेणात तण्डुलस्य पाकेऽन्वयसंभवेन तण्डुलः पचतीति स्यात् न वाश्रयाश्रयिभावस्यापि निरूप्यनिरूपकभावरूपसम्ब
न्धान्तरसापेक्षत्वेन सम्बन्धापेक्षत्वस्य संसर्गस्य संसर्गविषयाभानायोगाद् द्वितीयाया आवश्यकत्वेपि साधुत्वस्य तण्डुलः पच
तीति प्रयोगापत्तेः नामार्थधात्वर्थयोरिति नियमासंगतिः घटपटम् गोधावतीत्यादौ तत्सम्बन्धस्य सामान्येनैवान्वय इति न ति
रूप्यनिरूपकभावस्य संसर्गविषयाभानमिति चेन्न निरूप्यताविशिष्टत्वेन तयात तण्डुलस्यान्वयसंभवात् संसर्गमर्यादा
लभ्यसंसर्गे निरूपकाकाङ्क्षाया अस्वीकाराच्च अन्यथा निरूपकाकाङ्क्षायास्सर्वत्र सत्त्वेन संसर्गमर्यादया भानमेव न
स्यात् किंच देवदत्तनिरूपितसम्बन्धानुकूलव्यापारस्त्यर्थे देवदत्तस्संबधातीति स्यात् न च तस्मिन्नभिधित्सिते षष्ठ्येव
भविष्यतीति वाच्यम् प्रकारतयान्वये विवक्षिते एव तत्संभवात् न च प्रकारतयान्वयानभिधित्सायां सेवकभावेपि रा
जा पुरुष इति स्यादिति वाच्यम् नियमात् न च द्वितीयाया बाधान्न तथाप्रयोग इति वाच्यम् प्रकारतयान्वयाभिधित्सा
यामेव द्वितीयाप्राप्तेः न चास्ति क्रियायास्सर्वत्र सत्त्वात्तत्रैवान्वयो भविष्यतीति वाच्यम् देवदत्तस्तण्डुलः पचतीत्यापत्तेः
भजधातोः प्रीतौ व्यापारे च शक्तिः न च भजत्वेन तथा शक्तत्वेपि क्रियावाचकत्वेन धातुताङ्गात्वेन क्रियात्वेन च शक्तिः क
ल्प्यत इति वाच्यम् क्रियावाचकत्वं पुरस्कृत्यैव धातुत्वाभ्युपगमात् न हि धातोः क्रियायामिति विधायकमस्ति तद्वाचकत्वेन त ९

भविष्यत्त्वेऽपि तत्तत्तृतीयार्थः नन्वक्रियात्वेन तद्वाचकत्वस्य कथं नाम वर्तमानत्वेन नामैषामप्यात्वं नानायन्तिः तस्मात्प्रातिपदिकत्वादिवद्धातुत्व
मपि प्रक्रियोपयोग्येव नतु सामान्यतो धातोः क्रियावाचकत्वाभावे क्रियाबोधाभावं प्रति तत्तद्रूपेण धातुत्वावरणाभावस्य प्रयो
जकत्वे गौरवमिति वाच्यम् सिद्धपदार्थस्थले तदाभावप्रसङ्गे सामान्यतो दणाभावस्य प्रयोजकत्वकल्पनेऽपि बोधाभावविषयक
प्रसङ्गाननुभवात् प्रयोजककल्पनायाश्च फलत्वात् प्रीतौ तत्वेनैव नफलत्वेन कर्तरीष्यिकमित्यादौ फलत्वेनानुपादानात् गौरवाद
नुभवाच्च एतेन तद्धात्वर्थजन्यत्वमित्यादिकथनमफलमेव व्यापारेऽपि फकारत्वादिनैव अत एव तत्तत्कालेऽपि तथा प्रयोगः
ननु तत्तद्रूपावच्छिन्नसमुदाये प्रत्येकं तारोपात् फलाभावात् नामार्थत्वं तिष्ठमेव तत्काले मानुपस्थितेरनुभवसिद्धत्वात्
समुदायस्यैव वाच्यत्वे तत्कदाचित्तस्यापि बोधयतु वितः स च नानुभवसिद्धः वस्तुतस्तु समुदाय एव वाच्यः अत एव भूतत्वभवि
ष्यत्वयोः समुदाय एवान्वयः नातः फूत्कारभूतत्वमादायापाक्षीदिति प्रयोगः वर्तमानत्वस्य तत्समुदायान्वयासंभवात् प्रत्ये
कमन्वयः आरोपस्तु फल एव प्रकृतः कटं संश्त्य चशारम्भयात्रसैवधात्वर्थानन्तैवभूतत्वान्वयः समुदायस्य क्रियात्वेनजा
त्यभिप्रायकम् एकाक्रियेतिवत् ननु नष्टप्रतीत्यत्राभावरूपस्य नाशस्य जातिसम्बन्धप्रतियोगितानुयोगित्वयोरभावात् क्रि
यात्वस्य जातित्वमयुक्तमिति चेन्न अभावत्वस्यापि जातित्वस्वीकर्तृमते नोक्तेः क्रियात्वं तु निष्पाद्यत्वेन नत्वयात्वं वाच्यत्वेनना
तः याकरत्यादौ साध्यत्वम् तत्वेत क्रियत इति प्रतीतेः न च तदपि फलस्यैवेति वाच्यम् उत्पन्नेऽप्युत्पाद्यत्वव्यवहारात् अत एव

श्री दुर्गा: व्यु. टी. ७

व्यापारोत्पादकव्यापारस्यापि तत्त्वम् यत्तस्य च न चक्रदंकरी नीत्यत्रव्यदस्याप्युत्पादत्व प्रतीयत इति वाच्यम् यदान्तरसमभिव्या
हारे एव तत्प्रतीतेः न च इष्टवत्क्रियायिसत्त्वम् रूपेणास्येदेति वाच्यम् क्रियायाः इष्टत्वेनाभिव्यक्तेः न तथाइष्टस्य यद्यपि पदेगु
णस्यापि क्रियात्वे शामनत्याप्यनित्यगुणनाशयत्वान्तरस्य तव एवोत्पत्तेः सत्वोऽद्येतद्उत्पतेरभावान्नतत्वम् तथापि व्योत्पादकोत्पादक
भावः संसर्गमर्यादया भासते ननु संयोगसमवायातिरिक्तसम्बन्धेन पदार्थेषु गुणनाशसायोत्पादकभावादयः कुत्रान्त
र्भूतास्संसर्गत्वं च किंयेन रूपेणते भासंते काचतत्सम्पोदेति चेदुच्यते संबन्धत्वकादिशब्दानां क्रियाशब्दत्वात्संयुक्तादीनां क्रिया
यामन्तर्भावइति पदार्थान्तरत्वाभावः यद्यप्येकैकस्येव क्रियात्वेन सम्बन्धितत्स्येति पदार्थान्तरत्वमावश्यकं संबन्धादिशब्दोपा
दानाभावाच्च तथापि तात्पर्यादिवत्वप्यसंसर्गजनितत्वक्रिमवश्योपपदसम्बन्धस्यापेक्षभावइति न दोषः दयमेव च सं
सर्गमर्यादा यद्यप्यनुगतप्रतीत्यासंसर्गत्वस्य जातित्वं प्रामन्तथापि पदार्थान्तरतापत्तेर्न जातित्वम् किन्तु पदार्थान्वयि
त्वे सति पदार्थान्वयकारणत्वान्तरूपम्वा समवायस्य तत्स्वतन्त्रसिद्धत्वात्संयोगस्योभयोस्थल्यत्वात्पदार्थान्तरत्वम् ननु संसर्ग
स्यापि तन्न उपस्थितत्वाद्घटादिशब्दादाकाशस्येव बोधो न स्यादिति चेत्र संसर्गान्तरानुपस्थितत्वात् नभ्र देशविषयभावेन तयोर
न्वयः स्यात् घटादिशब्देभ्यो जातिव्यक्त्योरिवेति चेन्न व्यापारस्य प्रयोजनार्थत्वेन जन्यजनकभावस्येव संभवात् नचैकशब्दोप
स्थितयोः परस्परमन्वयोऽनुवितः अन्यथैकशब्दोपस्थितयोरव्यवहृतयोगयोरधेयभावेनान्वयः स्यादिति वाच्यम् तत्रेच्छा ८

याभिन्नत्वात् अत्र तु फलव्यापारयोरेकैकशक्तिविषयत्वात् न चैकैकशक्तिविषयत्वेऽपि उभयवत्पदार्थयोरिवान्वयो न स्यादन्य
थात्रापि स्यादिति वाच्यम् तत्रान्वयप्रयोजकरूपाभावात् अत्र तु फलव्यापारयोरुत्पाद्यत्वेन बोधात् फलस्य स्वोत्पा
दके व्यापारेऽन्वयः न च नाशस्य नाशकभावस्यापि संभवात् तस्यैव भाने स्यादिति वाच्यम् विक्लित्तिभिन्नाशोत्पत्तिकल्प
नायेदन्यापि विक्लित्त्युत्पत्तिकल्पनायां लाघवात् धातोः फलव्यापारोभयवाचकत्वादेव अत एवोभयोरपि याक इति
प्रयोगः एकवाक्ये उभयोः प्रधान्ये तु न व्यापारस्य स्वफलत्वेनाविवक्षितत्वात् सत्ताश्रीत्वादेरेव फलत्वात् अत एवैकैकशक्तिविषय
त्वेऽपीह निर्दिष्टवत्परस्परमन्वयो न स्यादित्यपि न शक्यम् एकवाक्यत्वेऽविगमाच्च न तु तात्पर्यत्वादेरपि निरूपकाकाङ्क्ष
त्वात् समन्वयद्वयस्य भाने न स्यादिति चेन्न न हि विशिष्टस्य समन्वयतः कल्पनात् न च फलव्यापारयोरिव व्यापाराणामपि सं
सर्गमर्यादया यौगपद्ये संसर्गेणान्वयः स्यादिति वाच्यम् सर्वव्यापाराणां युगपदनुपस्थितेः न तु तत्तद्रूपेण फलत्वाव
च्छिन्नविक्लित्तिभित्वादीनां शक्यतावच्छेदकत्वे संबन्धितावच्छेदकत्वेऽपि कल्पनीयत्वे घटकसमवायादिकल्पने चेति गौरवमिति
चेन्न अननुगतशक्यतावच्छेदकापेक्षयाऽनुगतशक्यतावच्छेदककल्पने लाघवात् तस्यैव संबन्धितावच्छेदकत्वात् न च
सकृदुच्चरितइतिन्यायविरोधः एकैकशक्तिविषयत्वात् न विशिष्यार्थबोधकत्वस्य वा न शक्तित्वम् सम्बन्धात्तस्य तत्से
वबोधकत्वेऽविरोधात् अत एव वह्ने प्रकाशकत्वशक्तिवत्स्वभावः तत्रापि न वेदहि शक्यम् तत्रापि प्रमाद्वारा समुच्चये सैव एका

श्री॰
दुर्गे॰
वृ॰ प॰
टी॰
८

शक्यत्वात् किं च तादात्म्यस्यैव तत्त्वपरस्परत्वमारोपेणैवं वैकस्य भजितस्य द्वयमपन्नानाधर्मिण्यारोपेण स्यादिति नेत्य अ
र्थस्योच्चारणासंभवात्स्वव्यवहारार्थमर्थधर्मस्यैव शब्दे आरोपात् न तु शब्दधर्मस्यार्थे आरोपः अत एव देवदत्तेन कृतमिति
देवदत्तमुच्चारयेति तथा च धर्मद्वयस्य भजावारोपः आरोपितशक्यतावच्छेदके अनारोपितशक्यतावच्छेदकत्वमिति
न दोषः आरोपितस्य शाब्दान्वयाच्च शब्दानां प्रकारत्वव्यवहारः आरोपश्च तत्तद्रूपेण अत एवाकाशत्वेनाभेदः शब्दत्वेन स
मवायः सर्वे यद्विशिष्टे तत्र शक्तिः तत्तद्रूपेणोपस्थितनानाव्यापारसमवेते शक्तिकल्पने तु गौरवात् धीमदनुकूलव्या
पारत्वस्यानुगतेन शक्यतावच्छेदकत्वासंभवाच्च पचतीत्यादौ फलस्य विशेष्यत्वार्थे व्यापारविशिष्टफले शक्तिकल्प
ने गौरवं तत्त्वाच्च न च पचतीत्यादौ तत्र विक्लित्तेः फलस्य प्रतियोगितायाम् त्यागः इति वाच्यम् प्रतियोगितायाः कल्पने
फलाभावात् फले पाक इति प्रयोगानापत्तेः अन्यथा शक्तेः क्रमतोपि कर्मप्रत्ययसमभिहारस्यैव नियामकत्वात् अ
न्ययोभयोरपि बोधः स्यात् अस्माकन्तु विति गमनाविरहादुभयोरपि पाक इति प्रयोगः किं च फलानुकूलव्यापारस्य पदा
र्थत्वे सकर्मकधातुस्थले फलेनाख्यातार्थान्वयप्रयोजकत्वाभावादन्यत्रान्यानुकूलव्यापारे देवदत्तो वर्तत इति स्यात् पृथक्
शक्तौ तु सामानाधिकरण्येन विशिष्टफले शक्तिस्वीकारादभिनिष्टफलमादाय न तथा प्रयोगः किं च केवलफलस्य भाव
नाभावाद्गौरवं द्व्यमानास्त्वित्यादौ समभ्यनामीतिः कर्मत्वकर्मणोस्तादात्म्याद्गतिश्च किं च फलस्य पृथगनुपस्थितत्वात् व्या ८

१८

पारेऽप्रतिकर्मत्वानापत्तौ लोके यत्नोत्पन्नापत्तिः एकदेशान्वयापत्तिश्च मन्दं गच्छतीत्यादावप्येकदेशान्वयापत्तिश्च न च व्य
पदेशिवद्भावेन फलस्यापि फलाश्रयत्वात्कर्मत्वमिति वाच्यम् असहायस्यैव तत्स्वीकारात् न च क्रियाविशेषणतामिति
नैयायिकरीत्या निर्वाहः केवलस्य क्रियात्वाभावात् अत एव जन्मत्वापायिन पृथगनुपस्थितेः तस्मादुत्पत्तिरूपफलाश्रय
त्वेनैव कर्मत्वं वाच्यं पृथगुपस्थितिं विना तदपि दुर्लभम् यत्र कर्मणि ल्यस्य कर्मत्वं स्यादर्थः कर्मत्वं फलमिति फलं कर्म प्रत्य
यार्थो व्यापारमात्रं धात्वर्थस्तत्र फलमाश्रयाश्रयिभावेन हर्योदावन्वेति तत्तोऽयं द्वयर्थो धात्वर्थे यात्र विषयकं कार्यकारणभा
वद्वयमाश्रयबोधार्थे द्वितीयाकार्यकारणभावश्चेति गौरवं हरेरभेदेनाश्रयेत तस्य च निरूपकतया फले इति सम्बन्धगौरवं
च हरिप्रीत्यादावन्वयिते नैकपदार्थत्वेऽपि विनाश्च एकपदोपस्थाप्ययोः फलव्यापारयोरन्वयस्यानुचितत्वाच्च कृतिवर्तमानत
योस्तवच्छेदकभेदात्सदानन्तार्थत्वमिति नैयायिकाः तन्न कर्मप्रत्ययस्य सर्वत्रैकत्वादेकस्यैव फलस्य बोधापत्तेः न च तत्र
त्समभिहाराद्विशेषबोध इति वाच्यम् द्वितीयायाश्च कृते समभिहारस्य बोधकत्वमिति गौरवात् न च तत्रापि फलेऽयाश्रो
पस्थितेः कर्तुरीप्सिततममिति सर्वेषां तत्साधारणफलाश्रयत्वेनैव कर्मत्वबोधात् तद्रूपेण फलाश्रयत्वबोधाय समभिहारस्य
च कारणत्वमावश्यकं समभिहारस्यासिद्धत्वाद् अतिरिक्तशक्तिकल्पनायेहापालघुत्वं चेति चेन्न कर्तुरीप्सिततममित्यनेनै
व फलस्य द्वितीयार्थत्वस्य तत्त्वाप्यभिमतत्वेन सामान्यविशेषबोधस्य न्यायापि स्वीकर्तव्यत्वात् सर्वत्रापि तद्रूपेणैव फलस्य

श्री॰
दुर्गे॰
व॰प॰
दी॰
५
१

ग्रहणाच्च सत्ताग्रहतिबोधयोरस्मादृशान्तस्वीकाराच्च किंच एधान्तरत्यादौ कर्मप्रत्ययाभावात्फलबोधो न स्यात् न च तत्र
प्रातिपदिकार्थप्रथमया फलबोधो भविष्यति पंचकपदे तस्य प्रातिपदिकार्थतो विरुपात् लिङ्गग्रहणं चत्रिकाभिप्रा
येणकेवलविभक्त्यर्थत्वाभावाच्च न प्रकारान्तरयाभानत्वाद्विवक्षायामेव च द्वितीयापादियज्ञात् समभिहारे फलव्यापा
रौ वैदयिकरणेन प्रतीयेते तन्नसकर्मकमिति वाच्यम् कर्मगतैकत्वादिबोधयिषया द्वितीयैकवचनादेरायत्तेः
न च स्वस्वव्यापारजन्यफलाश्रयत्वाभावान्नस्त्यायाग्रशाष्मान द्वितीयापत्तिरिति वेदेवत्वाद्धि कर्मत्वस्य तत्रासत्वा
त्फलस्य तत्र प्रातिपदिकार्थत्वाभावाद्दोषो न स्यात् प्रातिपदिकस्य कर्मत्वेन कारकेशाक्तावपि तत्त्वरूपेण फलावाच
कत्वाच्च अत एव याकोगमनमिति न न वोभयत्र कर्माकाङ्क्षायाम्न्नगुलस्य याको ग्रामस्य गमनमित्युभयत्रापि षष्ठ्
र्थे फलस्य भेदान्वयपर्यायत्वेनेति वाच्यम् केवलव्यापारार्थत्वे व्यापारस्य कर्त्राकाङ्क्षायामेवमत्वेन तण्डुलसेत्यापुपाश्वि
तेर्नियमाभावात् किंच फलस्याप्यतर्थाभावियत्वेन तण्डुलङ्त्यायनापत्तिः फलस्य क्रियात्वाभावात् न च कर्मावस्था
यां स्वनिष्ठफलोत्पादकत्वरूपो यो व्यापारेण सम्बन्धः स एव कर्तृत्वस्यायामिति तुल्यक्रियत्वमस्त्येवेति वाच्यम् कर्मावस्था
स्थायां कर्मप्रत्ययेन स्वनिष्ठफले तत्त्वौपिकत्वप्रत्ययेनान्नाद्व्यापारेण वान्वयेन स्वनिष्ठफलेतत्र्थालाभात् न च लः कर्म
णि तत्र कर्तृयदस्य कर्तृत्वपरत्वात् कर्तृत्वव्यापारः प्रत्ययार्थश्चेत्यपि वाच्यम् समानसूत्रोपात्तत्वात्कर्मणि तस्यापि कर्म ५

तेऽस्तथोपस्थितौ फलस्य धात्वर्थत्वानापत्तेः वैरूप्यस्याप्युक्तत्वात् कर्तृविहितादिमत्रापि तथानापत्तेश्च नवकर्तृविहितयोरेव लः कर्म
णीति तेषु कर्तृकर्मपदेन कर्तृत्वेन कर्तृकर्मत्वेन कर्मणामुपस्थितौ कविहितकर्मस्य कविहितकर्मणो वाचकत्वान्वोभयोस्त्यागस्तवतत्र
थमोपास्थितयर्मस्यत्यागएवेतिवाच्यम् कर्मत्वस्यकृत्राप्यवाच्यत्वेनवैषम्यानुद्धारात् यत्तुफलमात्रस्यधात्वर्थत्वेग्रामोगमः
नवानीतिप्रतीत्यापत्तिरिति भूषणकारः तन्न उभयोरपिधात्वर्थत्वेप्रत्येकमपिप्रयोगात्तस्येष्टत्वात् किंतुव्यापारेग
मनमितिप्रयोगाभावादेवदतोगमनवानितस्यानापत्तेः नचभावशब्दःस्यात्तन्त्रेणफलव्यापारावाहनतुधात्वर्थत्वेने
तिवाच्यम् कर्तृकर्मयदाभ्यामेवभावप्रधानाभ्यान्तयोर्लाभेभावेविधायकान्तुप्रासनवैयर्थ्यापत्तेः किंच पाकइत्या
दौधातुनाव्रजावफलहयवोधःस्यात् अस्माकंतुधात्वर्थफलेएवधातुनासाध्यत्वम् व्रजासिद्धत्वेवोध्यतेयाकोवर्ततत
इत्यादौतण्डुलेप्रतिसाध्यतावच्छेदनेप्रतिवसिद्धत्वेत्वभयसम्भवः किंच फूत्कारादीनान्ततद्रूपेणवोधस्यानुभवसिद्धत्वात्तत्त
द्रूपेणप्रत्ययवाच्यत्वेगच्छतीत्यत्रापितद्दोषवारणायसमभिव्याहारस्यनियामकत्वेतिगौरवम् नचतत्तद्धातुसमभिव्याहृ
तास्तिवादयोभिन्नाएववर्मैक्यन्नवैकत्वमन्यथाविल्कित्यनुकूलव्यापारनिरूपिताश्रयताविशिष्टवाचकत्वेनज्ञातस्यग
च्छतीत्यादावन्यनिरूपितविशिष्टवाचकतावच्छेदकत्वस्यतिवादौ क्लृप्तत्वेनात्मेप्रतिवाचकतावच्छेदकत्वानापत्तेः नच
घटस्याश्रयइत्यर्थेघटस्यति इतिप्रयोगवारणायनतित्वेवाचकतावच्छेदकम् किंतुतडत्वरतित्वमेव एवंचनसर्वत्र

विक्लित्यनुकूलवाचकत्वेनेतिवाच्यम् ततश्च विक्लित्यनुकूलव्यापारबोधाय विक्लित्यनुकूलव्यापारबोधाय विक्लित्यनुकूला-
व्यापारबोधाय पचनं तदव्यवहितोत्तरत्वनिवेशगौरवात् यत्तु एकस्यैव लः कर्मणीति सूत्रस्थभावपदस्य भूयत इत्यादावसं-
तेयपचनीयमित्यादौ सत्त्वे च विधानवदेकस्यैव कर्तृपदस्य तिङ्कृतिपरत्वे कृतिकृत्याश्रयपरत्वमिति तन्न सत्तासत्तयोरसू-
त्रेनुपादानाद्धोकल्पस्य र्वैकर्तृपदस्य तत्सूत्रेऽनुपादानाद्वैषम्ये बीजाभावात् पचनीयमित्यत्राप्यसत्त्वप्रतीतेश्च नच व्या-
पारप्राधान्यार्थं तमेवोचितं प्रत्ययार्थप्राधान्ये बोजनं तत्समर्वानेऽयास्थितिरेवेतिवाच्यम् खलकयोतन्यायेन प्राधान्ये कोप
स्थिते किंच पाचयतीत्यादौ प्रयोजकव्यापारवाचकणिचो नेदिष्ठमानत्वाभावात्तिङर्थप्राधान्ये स्यात् तिङर्थ्योभयव्या-
पारवाचकत्वे तत्प्राधान्ये विनिगमनाविरहः स्यात् उक्तानुकूलत्वादियवस्थापि स्फुटीभविष्यति किं च नन्वाश्रयोर्थः लः कर्म-
णीति सूत्रस्थकर्तृकर्मपदस्य व्यापाराश्रयफलाश्रयपरत्वाद्व्यापारफलयोरप्रधानत्वलाभात् यत्तु कृतिरित्यत्र कृञो यत्ना-
र्थत्वप्रसिद्धेः कर्त्रीत्यादौ कृत्याश्रयबोधाद्याश्रयस्य शङ्कतउपादानात्कृतिरेव भजनोत्पादोतिङ्वाच्येति तन्न कृञ एव व्यापारसा-
मान्यार्थकक्रियेति प्रयोगात् यत्नार्थत्वे कर्मकतापत्तेश्च नचव्वदेकरोतौ तत्र यद एकस्य कर्माय्योत्पत्तिरूपफलस्य वाच्यतमा-
वश्यके तथाचोत्पत्यनुकूलव्यापाराश्रयस्यैव कर्तृपदार्थत्वेऽप्यनुकूलव्यापाराश्रयादौ ना कर्तृपदवाच्यत्वं तस्मात् कर्तृप-
दसमभिहारे फलावाचकत्वे चैत्रस्य कर्तेति प्रयोगानापत्तिश्च तस्मात्कर्तृपदसमवेतः कृञः श्रमयत्वयात भेदाच्च सर्वेष्व १०

स्यात्सिद्धिरितिवाच्यम् समुदितशक्तिवादिमते फलेप्युत्पत्तिप्रतीतेः पृथक्शक्तिमतेपि सर्वत्रोत्पत्तिरूपफलस्यताद्व-
स्थतएवस्वीकारोपचत्तोप्ताप्युपपद्यते किंच कृञोयत्नार्थत्वानिरूढेयत्नार्थत्वेनैव रथंकरोतीतिप्रयत्नद्वयबोधः स्यात् नचरथंक
रोतीत्यत्रयत्नस्यासम्भवात्कृञर्थत्वमन्यत्रतत्समनुकूलयत्नएवकृञर्थोनातोकर्मकतापत्तिः कर्मत्वस्यावदोषत्वात
एवचेतनेएवस्वरसतः करोतीतिप्रयोगइतिवाच्यम् उत्पत्त्यनुकूलयत्नस्यैवकृञर्थत्वेएवंचतोत्पादोविल्किंमुत्पत्त्यनुकूलव्या
पारस्यैवक्रियात्वेनोत्पत्तिव्यापारयोर्मध्येयत्नप्रवेशासम्भवेनकृधात्वर्थक्रियानानापत्तेः उत्पत्त्यनुकूलव्यापारानुकूलय
त्नस्यकृञर्थत्वेतत्पक्षस्याप्यर्थोनोक्रियानानापत्तिः करोतीत्यादावाहतिप्रसंगश्च कृतिशब्दस्ययत्नार्थकत्वेनभावप्रत्ययस्य
फलव्यापारोभयवाचकत्वाद्व्यापारमध्येयत्नस्यापिप्रविष्टत्वात् यत्न कृञादौसकर्मकत्वव्यवहारोभाक्तइतिनैयायिका
स्तन्न लक्षणयासवेपिवोधेपिकर्मणासहविद्यमानेविद्यमानेकर्मयस्येत्यर्थकस्यवासकर्मकपदस्याकर्मकेप्रवृत्त्यसंभवात्
अन्यथा घटोपिलक्षणयाघटपदवाच्यः स्यात् नहितीरेगङ्गापदस्यभाक्तत्वेपितेनस्नानादिकेकार्येशक्योकर्तुमितिभवद्गो
कान्तनयुक्तम् शाब्दप्रत्यक्षदृष्टान्तस्यासंगतत्वात् नचभाक्तत्वस्यायमर्थस्सकर्मकपदेनलक्षणाकिंतुफलसहितः
र्थेधातोरेवेतिवाच्यम् लक्षणास्थलेलक्ष्यस्यैवप्राधान्येनकत्वेप्रत्ययस्थलेपिव्यापारादप्रतिफलस्यप्राधान्यापत्तेः अनुप
पत्तिविनालक्षणायाअसंभवाच्च किंच कृञोयत्नमात्रवाचकत्वेसंध्यामकुर्वाणः प्रत्यवायादिविषयविषयतापत्त्याभा

श्री॰
दुर्गे॰
व॰प॰
टी॰
११

एवतएवतस्मात् बीजादिनांकुरः कृत इति स्थाने भवगम्यदोषदानेनानुचितमेव उभयवादिसम्मतप्रयोगस्यैव वक्तव्यत्वात्
यद्यपि आश्रयेशक्यावनन्यगतत्वधर्मस्यावच्छेदकत्वे लाघवम् किंच आश्रयमात्रे शक्यावपि जनकतया क्रियायामन्व
योभविष्यति न त्वाश्रयत्वमात्रेण जनकता अत एव केचित्कर्मत्वशक्तिमत्त्वेन बोधमिच्छन्ति तस्माज्जनकतयैवान्वयो बोध्य
कर्तृत्वाख्यत्वमाचष्ट एकेन तथा च सम्बन्ध एव शक्यतावच्छेदकगौरवम् किंच स्वतंत्रः कर्तेति सूत्रेण देवदत्तादेः कर्तृत्वात्तस्य
वशात्स्वीयत्वेन नामार्थत्वाभावान्नामार्थयोरन्वयो रितिनियमाशंकातेन रूपेण धात्वर्थान्वये आश्रयवाचकत्वमफल
मिति तदपि न परमर्षिबोधितत्वेन गौरवविचारस्यानुचितत्वात् अन्यथा कर्तृपदस्यापि सर्वत्र लाघवात्कृतिवाचकत्वमेव
स्यात् न च तत्र कर्तारमप्यपेक्षायेनुरोधादाश्रयवाचकत्वमिह तु देवदत्तादेः कर्तृत्वेन बोधो विवादितस्य च कृतिवाचक
त्वे निर्वाह इति वाच्यम् तिबादिनैवाश्रयबोधे सम्भवत्यस्य महत्त्वोक्तत्वात् सन्मदिनार्थे महर्षितात्पर्यमिति विद्वांसस्तात्पर्यमेव तत्
रूपमहत्त्वानिष्टप्रसङ्गे स्यात् धर्मत्वागेनापि लाघवं सम्पादनीयमिति यथा गृहत्वहिंसालाघवं कोदशमिति विवेचनीयम्
भवन्मते धात्वर्थसहकृतोभेदसम्बन्धेन कृते देवदत्तादौ भेदेनास्मन्मते त्वाश्रयस्याभेदेन देवदत्तादौ तस्य धात्वर्थे भेदेनेति स
म्बन्धलाघवगौरवं स्पष्टमेव यद्यप्यभेदोपि सम्बन्ध एव तथापि षष्ठ्यभावप्रयुक्तं लाघवमस्त्येव सम्बन्धेपि भेदनियतत्वात्सम्ब
न्धस्याभेदो न सम्बन्ध इति तन्न युक्तम् सम्बन्धिनावच्छेदकभेदसत्त्वात् न हि घटो घटाभिन्न इति व्यवहार इति ब्रूमः इदमेव तादात्म्यमपि ॥

तादात्म्येन घटो घटवानितितिनैयायिकोक्तंत्वनुभवविरुद्धम् नवाभेदो नाम भेदाभावस्तथा चाभावस्यापि पदार्थान्तरत्वमेव यत
मयुक्तमन्यत्रादृष्टेव किंच अभावे प्रतियोगिनो भेदस्यानुयोगिनो घटादेरन्वयेपि भेदप्रतियोगिनो नीलादेरसंबंधित्वमयु
क्तमिति वाच्यम् भेदाभाववत्त्वस्यैव संबंधत्वात् अत एव नीलाभिन्नो घट इति प्रत्ययः प्रतियोग्युपस्थितेश्च शक्यताव-
च्छेदकगौरवमपि न घटादौ सकलव्यक्तिवाच्यत्वमवच्छेदककल्पनेप्यत्र देवदत्तादिनान्वयमात्रस्यापि विवादितत्वा
त् उक्तान्तरस्यापि पूर्वमुपपादितत्वाच्च कृतित्वस्यापि भवद्रीत्या क्रियात्वेन सांकर्याज्जातित्वासम्भवश्च तथाहि यतया
तथैव यत्नस्य क्रियात्वेतिऽर्थे यत्नस्य गुणत्वमभ्युपेयमन्यथा कर्मण्येवान्तर्भावे सिद्धे गुणेषु यत्नगणनमसंगतं स्यात्
न चोत्क्षेपणादिकमेव कर्म न तु धात्वर्थमात्रमिति वाच्यम् प्रोत्पत्त्यनुकूलव्यापारादीनां क्रियात्वानापत्तेः तथा च क्रि-
यात्वाभाववति यत्नत्वं गुणे यत्ने यत्नाभाववति क्रियात्वे प्रोत्पत्त्यनुकूलव्यापारे क्रियात्वयत्नत्वयोस्समावेशेन धात्वर्थेय
त्वइति सांकर्यसंभवात् न च व्यापारकारणतावच्छेदकतया कृतित्वं जातिरिति वाच्यम् बाधकविषयेप्युत्सर्गस्वीकारे वा
पकल्पनावैयर्थ्यापत्तेः चेष्टाकारणतावच्छेदकतया शरीरत्वस्यापि जातित्वापत्तेश्च न चानुगतप्रतीतिस्थले-
नैसांकर्यस्य बाधकत्वं तथा चानुगतप्रतीत्यैव कृतित्वस्य जातित्वमिति वाच्यम् शरीरत्वस्यापि तथात्वापत्तेः किंच
अनुगतप्रतीत्यैव जातिकल्पनमनुचितम् तत्कारणतावच्छेदकत्वादिना मानाभावात् इत्यादीनां जातित्वकथनमन्वयुक्तमे

श्री॰
दुर्गे॰
व॰ये॰
टी॰
१२
१५

वलौकिकेष्वेव जातिकल्पनस्य युक्तत्वात् अयं च भवदीयः पारिभाषिक इति मन्तव्यमेव न्याय्यम् समानकार्यकारिणि स
मानाकृतौ त्वतत्कल्पनमुचितम् ननु संयोगादिके इति किं कारणतावच्छेदकमिति चेन्न मद्रूपे सम्भव गृहाणः एकव्यक्त्य
भिनिवेशिनो मन्येत स्यात् अयमाशयः सकलव्यक्तीनां युगपदुपस्थितत्वसंभवात्कमदिश्यप सन्त्याकर्त्तव्या नात्र तथा सं
भवः महर्षेः कणभुजस्त्वैषां युगपत्त्वत्वदसंभवात् किंच द्रव्यत्वस्य जातित्वे शयिवांद्रव्यत्वस्थाने द्रव्यत्वसामान्यलक्षण
प्रत्यासत्त्याजलेपि द्रव्यशब्दवाच्यतास्थाने स्यात् नचानुगतप्रतीतिस्थलेष्वेव जातिस्वीकारे जातिस्वीकारोः फलेः आकृतौ
वनिर्वाहात् आकृतिस्वीकारस्यावश्यक अन्यथापि हि मयी गौरित्यत्र गोशब्दप्रवृत्तिरसंगता स्यादिति वाच्यम् रूपरसा
दावाकृत्यभावेन बोधानापत्तेः एवं गुणत्वमपि जातिर्न कर्मत्वं च अनुगतप्रतीत्या जातिरेव अत एव गुणेभ्यः पृथक् कर्म
गणस्थानासंगच्छते अन्यथा द्रव्यस्य वापितृविशेषाद्गुणेष्वेव गणनास्यात् ननु घटत्वादिना सांकर्यादाश्रयत्वस्य जातित्वम
युक्तमिति चेदत्र मन्तव्याकाराः पयोर्जात्योः परस्परासामानाधिकरण्येनैव सिद्धिः परस्परमाश्रयभेदकत्वात् लोकसिद्धा॰
तयोः सांकर्यस्यैव दोषत्वे यथा नृसिंहे अश्वत्वरेवाय्यं भूतत्वमूर्त्तत्वे पृथ्वीवीत्वशरीरत्वे जातिरूपे एवं अस्माकं तु नैवं याते
भाति नृसिंहत्वेपि सांकर्यं न यदि सम्पूर्णशरीरो नृत्वं सिंहत्वं च स्यान्नदेव सांकर्यात् न ह्यर्द्धं शरीरं नृत्वं सिंहत्वं वास्तित
स्मान्मन्वादिस्वत्वकुण्डगोलकादीनामेव संकरत्वम् तत्र वर्णद्वयोत्पादकसम्पूर्णवीर्यद्वयमेलनात् वीर्यद्वयेन

काजातिरितिविभावनेन सांकेतिकस्य मावतः संकरशब्दः एवं च सांकर्यस्य न कुत्रापि जातिबाधकत्वम् निरूपकस्यैवाभावेना
श्रयत्वे सांकर्यासंभवाच्च शरीरत्वस्य जातित्वाभावस्तु कस्य शरीरमिति संबन्धिकत्वादुपाधयः एवमाश्रयत्वस्यापि जातित्वा
भावकथनेन न कश्चिद्दोषः एवमनवस्थायाश्चापि न जातिबाधकत्वम् एकव्यक्तिकत्वादेव घटत्वादेर्जातित्वाभावात् सर्वे
जातिनिष्ठत्वजातित्वे स्वीकार्यमेव जातित्वे न वोऽयार्थेत्वत्रानवस्थायाश्च संभवश्च त्रस्त सत्तायाम् स्वत्वस्य तत्स्वीकारो वा एवं
समवायत्वमपि जातिरेव पदार्थत्वे स्वीकृत्य जातित्वाभावकथनेस्याप्रकृतत्वात् न च निरूपकस्यैव भेदेन समवायस्य घ
टादेरिवाकाशस्येति वाच्यम् उपाधिसमयेपि वायुराकाशघटाकाशयोर्वैकप्रतीतभावात् कस्य समवाय इति सम्बन्धि
कत्वान्नजातित्वमित्युक्तौ तत्संयोगत्वादीनामपि जातित्वं न स्यात् अनुगतप्रतीतिस्थले सत्तास्वीकारस्त्वनुचित एव शब्द
प्रवृत्तिश्च वक्तृइच्छयोत्पद्यते वा अयेनियमस्त्वबहिर्भूतगगर्गादीनामग्रहणाय अथात्मादिग्रहणेनापीदमेवज्ञाप्यते उपा
धिशब्दानामपि गुणत्वान्नर्भावः न च समवायशब्दो गुणशब्द एवास्तीति वाच्यम् गुणादिर्निर्गुणक्रिय इति भवदुक्तेः
अवाधितप्रतीत्या जातित्वस्यैवसिद्धत्वाच्च समवायस्य पदार्थत्वे त्वयं घटस्य रूपं रूपवांश्च घट इत्यादिप्रतीत्या समवायास्तु यथामात्रस्या
स्यादनवस्थितेरिति स्वस्वेत गुणगुणिनोर्नातिरिच्यते इत्याशयेन घटस्य रूपमिति व्यवहारस्त्वसमवायत्वदेकदेशरूपभेदनि
मित्तक निरूप्यनिरूपकभावसम्बन्धेनैव स्यादेव नीलो घट इत्यादयः प्रयोगाः गुणवचनेभ्य इति वचनमपि प्रयोगं दृष्ट्वैव प्र

हतम्‌ वस्तुत्वं रूपमिति तन्न तत्तद्रूपेणैव रूपेण ज्ञानात्‌ रूपशब्दस्य सञ्ज्ञाशब्दस्य घटाद्येकदेशभङ्गादीनां अत एव गुडो म
धुर इत्येव भवति न तु बलो गुड इति एतेनापि शब्दशक्तिस्वभाव इति मञ्जूषोक्तमप्यपास्तम्‌ अनतिरेकस्तु नीलादेरेव घटत्वादि
प्रतीत्या अनेकरूपोपस्थितिस्तु वस्तुत्वतया घटत्वादिवत्‌ एवमभावत्वमपि जातिरेव जातिसम्बन्धप्रतियोगित्वानुपयोगि
त्वयोरदर्शनात्‌ न जातित्वमिति तन्न युक्तम्‌ जातिं कल्पयित्वैव समवायस्य कल्पितत्वात्‌ एतेन सामान्यपरिहीना
स्तु सर्वे जात्यादयो मता इति नैयायिकोक्तमप्यपास्तम्‌ सम्बन्धिकमात्रे तु कौलन न किंचिद्बाधकम्‌ ननु अभावस्य समवायाभावाज्जा
तित्वे तस्याः केवलान्वयित्वात्स्वसम्बन्धिकत्वान्वेस्य संगतमिति चेन्न नहि तत्पातेषामभानमित्याशयात्‌ अभावस्य पदार्थत्वेन
घटो नास्ति घटाभाववद्भूतलमित्यादिप्रतीत्या नञर्थः प्रत्ययगत इति व्युत्पन्नकारोक्तं तन्न युक्तम्‌ नेह नानेति श्रुताव
व नञो जागरूकत्वात्‌ स चाभूर्वं एव न तु भावभिन्नः आत्माश्रयत्वापत्तेः एवं चाभावाभावोऽपि संभवत्येव एतेनाभा
वाभाव इति व्यवहारस्तु प्रामाणिक एवेति मञ्जूषोक्तमप्यपास्तम्‌ नन्वभावो न पदार्थः प्रत्यक्षाभावात्‌ न च प्रत्यक्षं न कस्या
पि भवति यावतः पदार्थस्य घट इति सञ्ज्ञा तावतोऽपि विषयताभावात्समुदाये दृष्टाः शब्दा अवयवेऽपि प्रवर्तन्ते हृतभक्तं तैलमभ्र
कमितिवदित्यस्य तदयमर्थः ते शब्दाः समुदायवाचका अवयववाचका अपि भवन्ति घटादीनां तु न कदापि प्रत्यक्षत्वमिति वाच्यं
शक्तिज्ञानकाले यावतः प्रत्यक्षं तावतः प्रत्यक्षसंभवादिति चेन्न गुणादेरिव विशेषणतया प्रत्यक्षसंभवात्‌ किं च हन्ति

मनोबोधेप्यात्मप्रयत्नवतीतिप्रयोगः स्यात् नवाव्यावर्त्तकत्वान्नतथाप्रयोगइतिवाच्यम् किंविषयकयत्नवानितिप्रश्नेपवनेप्रोत्साप
ते: किंच अवेतनेकृतेर्वाधादघ्योपाकृतीत्पादयोनस्युः आश्रयत्वेलक्षणायांलक्ष्यतावच्छेदकगौरवम् रथनिष्ठव्यापारे
णकृतेस्संबंधादर्शनात्तव्यापारेआश्रयत्वेवालक्षणासंभवः दूरसम्बन्धस्यानियामकत्वाच्च किंच यदिकाप्यवेतनेतिङः
प्रयोगः स्यान्नहिकुत्रचिल्लक्षणा स्यात् सर्वत्रसम्भावप्रशक्तिमेवावगमयतिप्रयोजनंविनालक्षणायाअसंभवश्च किंच प्रमाता
प्रमाणप्रमेयवादिभवन्मतेतिङःप्रमेयस्यविधेयतायाविधौलक्षणेनिषिद्धान्नामचलक्षणायाअसंभवश्च किंच अन्वयानुपपत्तिर्वा
लक्षणावीजं रथपदस्यापिरथवत्तिलक्षणासम्भवस्तरथविशिष्टत्वप्रतीतेःप्रयोजनस्यसंभवात् नवाश्रयत्वेस्वरूपेणलक्षणातद
वच्छिन्नरूपतादात्म्येनचलक्ष्यतावच्छेदकमस्तीतिवाच्यम् अस्मन्मतेआश्रयत्वस्यजातित्वाभावस्यस्वरूपतोभानसंभवेपिभव
न्मते ज्ञानविशेषाख्यातिरिक्तधर्माणांस्वरूपतोभानानभ्युपगमात् यत्र तात्पर्यानुपपत्तिरेवलक्षणावीजमितिमते तथा
कारास्त्वत्र पदतात्पर्यस्यादेयत्वात् बोधपदस्यैवमकरेतुलक्षणा न बोधस्यविधेयत्वात् नचबोधपदश्रवणेप्यनुप
पत्तेस्तत्रैवलक्षणेतितिवाच्यम् अन्वयस्यानुपपत्तिर्हिवीजम् अन्वयश्चद्वयोरितितयोरप्राधान्यात्र्थवत्तस्याश्रयोविवि
स्यात् तस्मादुभयमपिपर्यायपर्यायलक्षणावीजम् किंच लक्षणायांतथात्माश्रयत्ववोधनेपिशाब्दार्थमादायराकृतिरथे
रथोगच्छतीत्यपिप्रयोगः स्यात् गङ्गायांनबोधइतिज्ञानेतथमितमेवशाब्दार्थमादायेवहिसर्वोविचारः अन्यथाप्रिसमी

श्री॰ दुर्गे॰ व॰य॰ दी॰ ४८

प्रत्यजललक्षणयाग्निनासिञ्चतीत्यपिप्रमितेस्यात् तस्मात्प्रयोजननिर्वाहार्थमेव लक्षणा किंच यस्मिन्नर्थेयोनुशा॰
सितस्तत्रैव तस्य लक्षणया साधुत्वे कर्मणि पिपावक इतिस्यात् कृत्रिमदाश्रयतासम्बन्धेन भूमिः पचतीत्यपिस्यात् अथ
भावः लौकिकानां शब्दानामस्मिन्नेवार्थे साधुत्वमितिनियमात् अस्तु वा लक्षणाशास्त्रीयेतु शब्दे नियमाल्लक्षणा॰
याअसंभव एव अतएव विभक्तौ न लक्षणेति प्रवादः किंच शक्यतावच्छेदकारोप एव वा लक्षणास्तु आश्रयत्वे कृतिनारो
पेण्य निर्वाह एव यत्र शक्यसम्बन्धोलक्षणेति नैयायिकास्तन्न सम्बन्धस्य लक्षणात्वे सम्बन्धिनोहरित्रिमतेपि शक्तस्यह
तिसत्त्वानापत्तेः नच शक्यबोधकत्ववत् शक्यसम्बन्धिबोधकत्वमेव लक्षणेति वाच्यम् लक्षणायसम्बन्धेन सम्बन्धत्वेनैव बो
धकत्वनिर्णयात् प्रवाहवतीरत्वादात्म्यापन्नोपि गंगाशब्द इति चेन्नहि किं शक्यपेक्षया अपृथक् लक्षणाकल्पनेन पौ
ग्रोयस्थितिकत्वविलम्बोपस्थितिकत्वकृत भेदं स्वीकृत्य प्रकरणस्य नियामकत्वस्वीकारे तु प्रकरणेनैव निर्वाहे शक्तिस्वी
कारेन किं विद्यायकम् किंच शोभयावनस्य प्रतीत्यर्थमेव वा लक्षणा स्वीक्रियते सा च यथा गङ्गात्वारोपेण निर्वहति न तथा
सम्बन्धिस्मरणेन किंच सिंहो माणवक इत्यत्र विभक्तेः पूर्वं लक्षणा स्वीकारे सामानाधिकरण्यस्य नियततोय स्थितिकत्वाभावान्नपरमा
त्तस्यात् विभक्तिकृता लक्षणा स्वीकारे शक्योन्वितस्य विभक्त्यर्थस्य लक्ष्येन्वयानापत्तेः विभक्तार्थस्य शक्याभावादेव न ल॰
क्षणा अस्माकं तु शक्य एव प्रयोगोत्पत्तिस्तेनैव वक्तृरूपेण बोधयत्यत्र आरोपितमनारोपितं वा किंच सम्बन्धिबोधकत्वे ४८

वलक्षणत्वेन स्ववास्तविकतया शक्तेः पृथक् लक्षणास्वीकारो फलः स्यात् नहि शक्तिर्नाम वस्त्वन्तरम् किंतु शब्द-
सामर्थ्यमेव तच्च यथा प्रवाहस्योपपतितथा तीरमपि एतेन लक्षणाविषयककार्यकारणभावान्तरगौरवेण लक्षणा-
न्दूषयन्तो भूषणकाराः शक्यतावच्छेदकारोपस्यैव लक्षणात्वं स्वीकृत्य वृत्त्यन्तरत्वं स्वीकुर्वन्तो मञ्जूषाकाराश्च परास्ताः न
चारोपस्यैव लक्षणात्वे कथं तस्य स्पातिवदनमित्यादौ राहोः केवलारोपे ग्रासकत्तानुपपत्तिरेवेति वाच्यम् ग्रास्यग्रासकभा-
वस्याप्यारोपितत्वात् तस्यापि च स्पतीति शाब्दीयत्वात् वस्तुतस्तु सम्बन्धिबोधकत्वमेव लक्षणा कथं तस्येत्या-
दौ राहुचन्द्रयोरन्वयानत्वादारोपासम्भवात् सम्बन्धिबोधकत्वस्य च स्वभावसिद्धत्वात् शक्तिलक्षणयोर्भेदश्च तत्कृत एव
सिंहो माणवक इत्यत्रापि च कालक्षणां कृत्वैव प्रयुङ्क्ते न च तत्र राहोः केवलारोपः किंतु कवेरेव कथंचिदारोपिते राहुत्वे
तु वास्तविकमेवेति ग्रासकत्तोपपत्तिरेवेति वाच्यम् सिंहो माणवक इत्यादौ तद्बोधोपादानेनैव तथासम्भवात् न च तस्य
प्रातिपदिकार्थत्वाभावात्प्रथमा न स्यादिति वाच्यम् सिंहत्ववान्सिंहसादृश्यस्यापि सिंहशब्दार्थत्वात् तस्यापि प्रवृत्ति-
निमित्तत्वान्न लिङ्गस्यैवाभिकार इति नियमे न व्याहतिः अत एव सिंहो माणवक इत्यस्य सिंहसदृशो माणवक इति विवर-
णं न तु सिंहत्वविशिष्टो माणवक इति किंच आरोपस्यापि सम्बन्धमूलकत्वाल्लाघवात्सम्बन्धस्यैव निमित्तता युक्ता किं-
च आरोपस्यापि सम्बन्धमूलकत्वे, यदि सिंहः शाब्दो गुणनिमित्तकस्तर्हि गुणनिमित्तकारोपः स्यात् न तु गुणनि-

श्री॰
दुर्गा॰
वृ॰य॰
टी॰
१५
15

मित्रकत्वेनमुख्यएवस्यान्नत्वारोपितइति चेत्किमत्रसारोपलक्षणिकायोरजहत्स्वैवान्यथा वा किंच यत्रमीशाभ्रान्तिर्धर्म्मस्येशा-
भ्रान्तिर्वा आयेवोयस्याश्रमितत्वंस्यात् गुरुपुत्रेगुरुत्वस्येवेतिचेद्गुरुवदित्येवनतत्रशब्द इतिस्यात् अस्तुवागुरुशब्दस्यपुत्र-
त्वानिमित्रकत्वात्तत्रेपिप्रयोग सिद्धत्वस्यतज्जानितादन्यत्रप्रयोगानुचितएव नापिधर्मीशाभ्रान्तिर्धर्मितानपूर्वकत्वा-
द्धर्मत्वानस्यधर्म्मेशाभ्रान्तिसोकारेतत्पशक्यतावच्छेदकारोपासंभवएव मंचाः क्रोशन्तीत्यादावपि मंचत्वारोपेक्रोशकत्वा-
नुपपत्तिरेवक्रोशकत्वस्यसारोपितमितिचेन्न आशेयितमंचत्वविशिष्टेक्रोशकत्वस्यमुख्यत्वादारोपासंभवात् नमंचत्वे
नमुख्यत्वमिति चेन्न शब्दान्तरानुपस्थितत्वात् अतएवश्वितशब्दस्याश्रितादिप्रकृतिकेलक्षणत्वादिव्यवहारः नचा-
रोपेविनागुणादागतइतिगुणादिनगौणशब्दप्रवृत्तिर्नस्यादितिवाच्यम् तत्रापिस्वार्थनिरूपणाश्रयतासंबन्धस्यैवनिया-
मकत्वात् अतएवलक्षणायोअकारत्रिरूपणेसंगच्छते नचगोपीभार्य्यायसेत्यादौपुंसिगोपालकर्तृत्वस्यास्त्रयोगो-
यसम्बन्धस्यनिमित्तत्वात्पुल्लेप्रवृत्तिनिमित्तभापितपुंस्कत्वाभावात्पुंवद्भावोनस्यादितिवाच्यम् गोपालनस्यैवोभयत्र
निमित्तत्वात् पुंसिसमवायेनस्त्रियांस्वम्बन्धितेनेतिविषयविभागात् नचतन्मात्रयोर्यिस्यादितिवाच्यम् दाम्पत्यस्यारो-
पनियामकत्ववदत्रापिसंभवात् नचशक्तेरपूर्वत्वाल्लक्ष्यतावच्छेदकेपवलाघवगौरवविचारोपुक्तोनत्वलक्षणायामि-
तिवाच्यम् लक्षणायैवनिर्वाहस्थले तद्विचारस्यपुक्तत्वात् सकानुसंधानपूर्वकत्वाद्गौरवात् यदितुआश्रयत्वादौ १५

लक्षणायामित्यादियदाह वाहकेऽरथ्यत्वारोपेणास्येवार्थो रथेन गच्छतीत्येव स्वारसिकः प्रयोगः भवन्मतेऽपि अचेतने इच्छाया
अभावात् कर्त्तरीत्यस्य तन्मित्यस्याप्राप्तेः इत्थं च तेन दात्र्यनेन तण्डुलेनेत्यादौ न तण्डुलात् द्वितीयापत्तिः कर्मवत्कर्मणेत्य
तिदेशात् लकारस्य कृतिवाचकत्वेन लकारवाच्यः कर्त्ता कर्मवदित्यर्थासम्भवात् अतिदेशादेव न परयाकर्तृसंज्ञाया बाध
संभावनापि न च कर्मसंज्ञकार्थोऽत्यातिदित्यर्थसम्भवः कर्मणो द्वितीयार्थत्वानापत्तेः किञ्च देवदत्तो हरिं भजतीत्य
त्र तिङा कर्तुरनुक्तत्वात् तृतीया स्यात् न च तत्रापि कर्तृत्वे इत्येवार्थ इति वाच्यम् देवदत्तेन कृतमित्यत्र तन्मते कृतिवाचकत्वात्
कृतस्तत्रापि कृते कर्तृकत्वात् तृतीयानापत्तेः न च तिङादिभिरेवाभिधानमिति नियमः परिगणनस्य भाष्येऽप्रत्याख्यानत्वात्
न च कर्तृगते कत्वेनुक्ते इत्यर्थ इति वाच्यम् याचको देवदत्त इत्यत्र तृतीयापत्तेः न च याचकक्रियाकर्तृसंख्यानभिधानेऽपि
प्रधानक्रियाकर्तृसंख्याया उक्तत्वेन न तृतीयेति वाच्यम् क्रियाया भवन्मते अप्राधान्यात् उक्तनियमानुपपत्तेः किञ्च त्वं भजसी
त्यादौ सामानाधिकरण्याभावात् पुरुषव्यवस्थानस्यात् युष्मदेन तिङर्थाश्रयेण वा सामानाधिकरण्यग्रहणे तु गौरवं युष्मा
णाभावश्चेति दिक् एवं चैकलक्ष्मीदत्ताभिन्नाश्रयको वर्त्तमानकालिको हरिनिष्ठोऽत्यनुकूलव्यापार इति बोधः एवं का
रकान्तराण्यपि यथायथं योजनीयानि अथ मञ्जूषाकाराः कर्मत्वादिशक्तिमत्त्वेनैव बोधः सप्तमीपञ्चम्याविति सूत्रे शक्तिः
कारकमिति भाष्यात् येन शब्देन शक्तिमत्त्वानन्तर्यकारकबोधस्सैवोचिताश्च अत एव न सर्वकार्मीणं वेद्यमिति इदं तन्मते

श्री॰
दुर्गा॰
व॰प॰
दी॰
१९

16

त् सञ्ज्ञायाः सर्वकार्यार्थत्वात् अन्यथा पाणिनेः पूर्वं वा याभावप्रसङ्गात् अतएवव्याकरणान्तरेणान्यसञ्ज्ञयापि द्वितीयादी
नामभिधानम् अतएवसाधनकारकयोः पर्यायता सामान्यविशेषसम्बन्धेषष्ठ्यतएवचषष्ठीतदतिरिक्तविभक्त्यर्थभेदः किंच
हरिकर्मकगमनजनमिति वा येगमनशब्देनफलस्याग्रहणेक्रियान्वयित्वेनस्यात् व्यापारप्राधान्येव व्यापृत्येत व्यापारेग्रहणेनत्र॰
साक्षादन्वयाभावादप्रामाणिकोबोधः स्यात् वैरूप्येन सर्वत्रद्वितीयायाआपत्तेरर्थकत्वात् व्यापारत्वावच्छिन्नात्वाद्वि
त्परम्परया गांदोग्धीत्यादावपिविभागानुकूलव्यापारानुकूलव्यापारएवार्थइतिगौरप्याश्रयतमेव नन्वेवमपादानत्वेनस्यात्
नवापादानत्वेनविवक्षायामितिवाच्यं नहिविवक्षायोग्यमात्रजतोत्पापतेरितिचेन्न दुहादिपरिगणनादन्यत्रकर्मताभाव
वदनत्रापादानत्वाविवक्षणात् अन्ताभ्यितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारस्यैवदुहधात्वर्थत्वेन कस्यांनरत्वाकाङ्क्षा
यांषष्ठ्याएवप्राप्तेः किंच द्रवद्रव्यनिष्ठविभागानुकूलव्यापारस्यधात्वर्थत्वेद्रवद्रव्यस्यधात्वर्थसंगृहीतत्वेनाकर्मकत्वंस्यात्
द्रवद्रव्येतेनशक्तिस्वीकारेयस्येनकर्मत्वानापत्तिश्च विभागानुकूलव्यापारानुकूलस्यधात्वर्थत्वेतुविभागस्याश्रयतदनु
कूलव्यापारस्यचगाविसत्वादुभयोः प्रयोगः नचविभागेवषित्वेनान्वयेपादानत्वप्राप्तिर्विभागानुकूलव्यापारेन्वयेतुकर्म
त्वप्राप्तिरितियुगपत्प्राप्त्यभावादपादानत्वादिविशेषैरविवक्षितमित्यसंगतमितिवाच्यम् विभागानुकूलव्यापारएवाव
यित्वेनविवक्षणेअपादानत्वमाश्रयत्वेनविवक्षणेचकर्मत्वमित्याशयात् अन्ताभ्यितेतिविशेषणाभावेपिविलक्षणावि १९

विभागग्रहणात्वान्यत्रदोषः आश्रयत्वादिरूपशक्तिग्रहणाच्च शक्तिद्वयमध्येऽत्यादिव्यवहारः तत्तदर्थत्वेनैवाद्वितीयायाः
प्रामाणिकगौरवस्यादुष्टत्वात् अत एव देवदत्तेन पक्वस्तण्डुल इत्यादावपि बोधः हरिः सेव्यत इत्यत्रापि व्यापारविशेष्य
कएव बोध एव इति शाब्दिकाः मञ्जूषाकारास्तु फलविशेष्यकं बोधमिच्छन्ति तेषामयमाशयः औत्सर्गिकस्य प्रत्ययार्थप्राधा
न्यस्य भावप्रधानमाख्यातमिति वचनप्रामाण्येन त्यागे यत्र प्रकारतयोपस्थितस्यार्थस्य त्यागे मानाभावः भावप्राधान्यस्य च फल
व्यापारोभयवाचकत्वान्न क्षतिविशेषः किंच उभयोस्समानार्थत्वे कर्मप्रत्ययप्रयोगे न कुम्भोत्पद्यानव्यापारान्वितक
र्तृप्रत्ययप्रयोगस्यैव कर्तृमुचितत्वात् अत एव इष्यते पुत्र इष्टः पुत्र इत्यर्थे पुत्रीयतीति प्रयोगो न भवति भिन्नार्थत्वादित्युक्तं
स्वयमात्मन इति सूत्रे भाष्ये सत्यां याः कर्तृप्रत्यये कर्तृविकर्मणोरित्यर्थेन क्यचो वारणासम्भवेपि भिन्नार्थत्वादित्युक्तत्वात्ता
रस्यमेव अत्रेदं चिन्तनीयम् कर्मप्रत्यये फलस्य प्राधान्येप्युप देवदत्तेन गम्यत इति प्रयोगो न स्यात् व्यापारसमये सं
योगस्यानुत्पन्नत्वात् किंच व्यापारसमयेपि निष्पन्नस्य फलस्याभावाद्देवदत्तेन न पच्यत इति स्यात् किंच सर्वकारका
णां साक्षात्परम्परया वा व्यापारान्वयस्यावश्यकत्वेन कर्मणोऽन्वयापत्तेः देवदत्तेन पक्वस्तण्डुल इत्यत्र तत्तत्प्रधाना
नि नामानीति वचनान्न व्यापारान्वयः किंच गौः पयो दुग्धे देवदत्तेन पयस्तद्धो ग्रामं गम्यत इत्याख्याता निनामानीति
दौ मध्यवर्तिनः फलस्य प्राधान्ये पूर्वोत्तरयोर्व्यापारफलयोरनन्वयः स्यात् किंच फलप्राधान्ये तत्रैककालान्वयेया

श्री° दु° गौ° व° प° टी° १७

पारवर्त्तमानत्वेपियद्यतइतिस्यात् स्वयग्रात्मनइतिसूत्रस्यभाष्येतन्मयापियोजयितुंशक्यम् तथाहि अथेहवा
चाभवितव्यमिष्टः पुत्रइष्यतेपुत्रःकेचितावदाङ्गनभवितव्यमिति किंकारणंस्वशब्देनाकृतत्वात् अपरस्याङ्गभ
वितव्यमितिकिंकारणंधात्वर्थेयंकाववधीयते स्वधात्वर्थः केनचिदेवशब्देननिर्दिष्टव्यमितिइत्तिभवेतस्माव
दाङ्गः नभवितव्यमितिकिंकारणंसमानार्थेनवाक्येनभवितव्यम् प्रत्ययार्थेनचप्रश्नेहार्थोवाक्येनगम्यतेइष्ट :
पुत्रइष्यतेपुत्रइतिचनासौप्रत्ययार्थेनगम्यतेइतिहितत्रक्रमः तत्रचपुत्रीयइत्यस्यार्थविचारोनासौप्रत्ययान्तेनग
म्यतइत्युक्तेः नतत्पुत्रीयतीत्यस्यग्रन्थस्याकर्मकत्वात्कर्मप्रत्ययासम्भवात्कर्मप्रधानकेइष्टः पुत्रइत्यत्रशंका
यात्रसंगतत्वापत्तेः प्रत्ययान्तार्थस्य पुत्रकर्मिकाइच्छातस्य चइष्टः पुत्रेत्यन्तर्गतपुत्रइषइत्यत्रासत्त्वान्नकाचित् कर्म
योपकप्रत्ययस्याग्रेस्थितत्वान्नतद्विनापुत्रेकर्मत्वप्रतीतिरितिभावः फलव्यापारयोःप्राधान्यविचारस्त्विङन्तेषु
कृत्स्वैवप्रयोगात् एवंवावयवार्थविचारपरभाष्यमादायसमुदायार्थव्यवस्थापनेनयुक्तम् इदंवसूत्रार्थकथन
मेवान्यथाप्रत्यासत्त्याकर्मवाचकोयः सूपतदन्तग्रहणेनसिद्धेभाष्यस्यासंगतत्वापत्तेः एतेनैतद्भाष्यप्रामाण्याद
तिविग्रहयोस्समानार्थकत्वकथनमप्यनुचितमेवसूत्रार्थविषयत्वाभावात्क्वचोपात्तिवचनत्वात् नचवस्तुस्यर्थंवो
धायेवहिविग्रहः क्रियतइतिसमानार्थत्वंयुक्तमेवेतिवाच्यम् इतिविग्रहशब्दयोरर्थस्यविलक्षणत्वात् तथाहिव १७

तेनेह निर्वर्तितेनैव शब्दस्यार्थेन तस्य च स्वार्थस्यैव ग्रहणे सर्वेषां स्वार्थे वर्तमानत्वाद् व्यावर्तको हि न शब्दः स्यात् तस्माद्वि
लक्षणार्थ इति तेषां स्वम् विलक्षणत्वे च विग्रहाच्छिन्नत्वम् विग्रहस्य विशेषस्य ग्रहो यस्मिन्निति गुणादितः समुदित
वाक्यार्थोच्छिन्नग्रह एव एवं च विग्रहस्यान्यत्वं एवं च विग्रहस्यान्यपदार्थो हि तत्त्वान्यपदकर्तृत्व शक्यः गौरवे चैकस्यैव श
ब्दस्याभिन्नार्थत्वे अन्यान्यार्थबोधनाय प्रयुक्तयोरन्यार्थत्वमवितमेव न हि एकस्य शब्दस्याभिन्नार्थत्वे अन्यान्यार्थबोधनाय
प्रयुक्तयोरन्यार्थत्वमवितमेव न हि एकस्य शब्दस्यार्थबोधाय मायशब्दान्तरं प्रयुज्यते समानार्थत्वं घटकलशयोरिव मन
बहुव्रीह्युपजीव्यस्य समानधर्मबोधकत्वस्य विशेषद्भ इति वाच्यम् स्योपजीव्यविघातकत्वातिरिक्तस्यैवातिभिन्नत्वाभ्युप
गमात् स्यस्यापि अविहन्तृत्वे शास्त्रमफलं स्यात् न च तत्समानाधिकरणो बहुव्रीहिरिति किं तत्समानाधिकरणाना
मिति किं च समानाधिकरणानामिति पि फलितेन तत्त्वानम् न च स्वातिरिक्तसमर्थः यदविधिरिति इति वाच्यम् तन्मह
ति पूर्वकमेव सर्वेषां ग्रहणेः नापि प्राप्तभार्यं प्रमत्सप्तावान्तयपतिः अत एव सामानाधिकरण्यसत्त्वात् अवतो भार्यांप्रता
रोपितकर्मत्वस्य च वा प्राप्तौ सामानाधिकरण्यारोपात् प्रकृत्य सामानाधिकरण्यारोप एव न तु भार्याप्रतिकर्मत्वारो
पः कर्मत्वादीनां कारकाधिकारस्थत्वात्तत्वान्त्क्रियान्वय एव साधुत्वात् अत एव विभक्तिवाच्यतावच्छेदकरूपेण का
र्मादीनामभानान्नयकल्पाए दुलद्भ्यादौ द्वितीयापत्तिरिति भवद्भक्तिः संगच्छते शिखावानस्थलद्रव्ययिनकिं तु शिखा

श्रीः
दुर्गाः
व॰य॰
दी॰
१८

वान्नास्तीमेवतत्रैवाशित्वावतोऽप्यभावोनन्नाशित्वायायएव किंच विशेषणाभावप्रयुक्तविशिष्टाभावसत्वात्तथाप्रयोगोपि
कर्मत्वस्यविशिष्टेन्वयासंभवएव किंच यदिपूर्वंविशेषणेन्वयःस्यात्तदातत्प्रयुक्तोविशिष्टेप्यन्वयःस्यात् ननुविशिष्टस्य
विशेषणप्रयुक्तोन्वयः सामानाधिकरण्यस्यतुविशेषणान्वयपूर्वकोविशेष्येन्वयसंभवः यदपि कालाःपरिमा
णिनेतिसूत्रस्यभाष्यकथनंतदपिविपरीतमेव द्वन्द्वौजातशब्दार्थप्राधान्याद्विग्रहेतस्मात्षष्ठ्यादनस्यभाष्येऽसं
गत्यापत्तेः नचभिन्नार्थत्वेकिंप्रधानोयंसमासइतिभाष्यप्रश्नासंगतिस्तस्यबहुव्रीहिविग्रहयोस्समानार्थत्वेप्रश्नस्यचोभ
यविषयत्वेएवसंगतिरितिवाच्यम् उत्तरपदार्थप्राधान्यस्याविवादितत्वादन्यपदेविग्रहेषष्ठीदर्शनेनसन्देहात् भि
न्नार्थत्वादेवयाचकइत्यस्यपचतीतिविग्रहः अतएवसंज्ञाकालेसञ्ज्ञिनःप्रकारत्वेनबोधकालेप्रकारित्वम् कारणा
दात्तप्रथमान्तविशेष्यकशाब्दबोधमिच्छन्ति हरिरिवहृष्टोन्यत्रकूलव्यापारानुकूलकृतिमानिति तेषामयमाशयः
प्रकृतिप्रत्ययार्थयोःपाणिनिमुक्तत्वेपिसमुदायशक्तेरनुक्तत्वेनान्वयोधाराणस्यलौकिकस्यैवग्रहणाल्लोकेच[illegible]स्यैवप्राधा
न्यात्प्रथमान्तार्थस्यप्राधान्यम् प्रत्ययार्थत्वेनप्राधान्यमेवकर्तृत्वेत्याह॥भगवान्पाणिनि अन्यथाकृतावितस्केपिकृत्या
श्रयत्वेनबोधेसिद्धेतत्कथनानर्थकंस्यात् वैयाकरणानामपिप्राधान्यस्यप्रत्ययार्थत्वेनोचितत्वाच्च तिङर्थाश्रयार्थत्वेक
स्याश्रयइत्याकांक्षायांव्यापारस्यतत्रविशेषणत्वोचितत्वाच्च किंचविशेषणेउक्तेविशेष्यस्याकाङ्क्षाभवतिनतुविशेष्ये १८

विशेषणस्यैवं च भजतीत्युक्तेः करणाकार त्वाभवतीति तदेव विशेषणं देवदत्त इत्युक्ते तत्वर्णेन तद्गणेव गम्यते न तु किंक
रोतीति न च भावप्रधानमाख्यातमिति यास्कस्मृतिविरोध इति वाच्यम् तस्य केवलाख्यातमात्रप्रयोगविषयत्वात् सत्वप्र
धानानि नामानीत्युत्तरवाक्येन नाम्नामपृथगर्थकथनात् एवं च तत्प्रावार्थे तिङ् नार्थकथनेन तत्समुदायार्थविशेषणवि
शेष्यभावनियामकमन्यथा भावप्रधानं वाक्यमिति ब्रूयात् अत्रोच्यते क्रियार्थककारकशब्देनाधिकारविहितत्वाव
तां क्रियायामन्वय एवं भगवता पाणिना साधुत्वं बोध्यते न तु क्रियायाः कारके न च विशेष्यतया क्रियायामन्वयोस्त्विति
वाच्यम् सर्वकारकाणां तत्रान्वयस्यापेक्षितत्वात् कर्तृप्रत्यये च कर्तृमात्रस्य विशेष्यत्वमितरेषां विशेषणत्वमिति
भवन्मतम् न च एकस्मात् कारकाणां विशेष्यत्वे कथं साधुत्वमिति वाच्यम् विभक्तिवाच्यतावच्छेदकरूपेण कर्मत्वादी
नामभानात् समुदायशक्तिस्वीकाराद्वा न च तवापि कस्यचित्फले कस्यचिद्व्यापारे इति चेत्तुल्यमभानात् समुदायशक्तिस्वीका
राद्वा न च तवापि कस्यचित्फले कस्यचिद्व्यापारे इति चेन्न्यूनमस्तीति वाच्यम् क्रियाशब्देनोभयोर्ग्रहणात् स्वरेयताश्रयणाद्वा
तत्रापि क्रियान्तरान्वय एव वा साधुत्वात् न हि तिङन्तं विना कृदन्तेनार्थः समाप्यते आकाङ्क्षानापि व्यापारे एव वृत्तौ पास्थि
तया तन्नाव्यापारस्य क्रियात्वेनोपस्थितौ करणस्य कर्तृसापेक्षत्वात् कर्तृविशेषणत्वम् अतएव तत्प्रत्ययार्थप्राधान्यम् अ
न्यस्य तु निरपेक्षस्यैव प्रत्ययार्थस्य प्राधान्यमौचित्यात् अतएव कारके इत्यधिकारः कृतो न तु व्यापारे इति किं च इदं प्राधाः

श्री॰
दुर्गा॰
वृ॰ य॰
टी॰
१९

19

मेवुचायथिषिति स्मीत्येतावन्मात्रे प्रयुञ्जीत विशेषबोधनार्थं येव हि विशेषक्रियायोगस्तथा च पदे योजनार्थं विशेषप्रयोगस्त
स्यैव प्राधान्यमुचितम् किंच विभज्यते यया सा विभक्तिरित्यन्वर्थसंज्ञया यङ्कर्तृनिष्ठो यङ्कर्मनिष्ठ इति विभक्त्यर्थो
नायार्थनिर्णायकत्वमेवोचितम् एवं च यन्निर्णायकौ येषु एव मुख्यः किंच नामार्थानामन्वयार्थानां चानेक
त्वाद्धात्वर्थस्यैकत्वात्तत्रैवान्वय उचितः न च प्रथमान्तार्थप्राधान्ये तस्य देवदत्तत्वादिना सन्नापान्नातत्वेन विशेषणमा
त्रयोगः क्रियते क्रियया प्राधान्येन तु तस्यास्तन्मायाप्यपि बोधार्थं भजतिभवतीत्येव स्यादिति वाच्यम् भजतीति निशा च
ते इति वर्तमान इत्यर्थके न व्यापारसत्ताबोधनात् वर्तमानत्वं च क्रियाकालयोरैकः मतेसालाभेदमते याशेषिते
भजतिभवतीति तद्वैब्राह्मणविति वत् नन्वयार्थव्यापाराश्रये लकार इत्यर्थे व्यापारे प्रत्याश्रयस्य प्राधान्यादा
यौ चितत्वे वोचित इति वाच्यम् फलाश्रये द्वितीयेत्यर्थेन कर्मणोपि प्राधान्यापत्तेः न च ग्रामित्युक्ते कर्मनिर्दिष्टक
ता क्रिया चाभिर्दिष्टे इति भाष्यप्रामाण्यादस्यैव प्राधान्यमिति वाच्यम् गम्यमाना क्रियामादाय तथोक्तेः किंच
विशेषणेन विशेष्यस्य प्रकाशो भवतीति क्रियाप्रकाशकद्वाणो विशेषणत्वमेव युक्तम् न चैवमेकवाक्यताः
न स्यात्सर्वेषां क्रियान्वयेपि परस्परमन्वयाभावादिति वाच्यम् भवन्मतेपि कर्त्रितरेषां परस्परमन्वयाभावात् न
वे देवदत्ताभिन्नाश्रयको व्यापारो हरिनिष्ठप्रीतिजनक इत्यर्थे देवदत्तीय व्यापारान्तरस्यापि प्रीतिजनकतया बोधः १९

स्यादिति वाच्यम् व्यापारान्तरेण प्रीतेर्जन्यजनकताभावात् ननु धातोः कर्तरि लकारइत्यस्य धात्वर्थानुकूलकृतिमती
त्येवार्थो न तु धात्वर्थाश्रये अन्यथाश्रयेऽश्वेऽपि वदेत् अत एव व्यापारस्य क्रियात्वेन भानम् न ह्याश्रयतामात्रेण करण
प्रतीतिः न च देवदत्तकर्तृककरणत्वार्थेनापि निर्वाहः कर्तृशाब्दे न कृतेर्देवदत्ते प्रकारतयान्वयस्यौचित्यादिति चेन्न सम्प्रदा
नापादानयोः कृञोऽभावात्तयोः क्रियाजनकत्वानापत्तेः किं च यथा चैत्रादौ देवदत्तस्य सम्प्रतिकृतिमत्ताभावाद्धि
श्लिष्यत्वनुकूलभूतकालिकव्यापारानुकूलकृतिमानिति बोधितः स्यात् ननु विशेषणभूतत्वप्रयुक्तो विशिष्टे भूतत्वे तु
च्यते पत्नीत्यसीदितिवत् न चाप्तिसामानाधिकरण्याभावान्नन्वयं न स्यादिति वाच्यम् तस्य सम्बन्धांशे विवक्षणत्वादिति
चेन्न गौरवात् किं च देवदत्तेन पचत्दत्तो ग्रामे गम्यत इत्यादौ मध्ययाति व्यापाराश्रयत्वेन पञ्चदत्तस्याभाने न स्यात् सम्ब
न्धितस्य धात्वर्थतावच्छेदने गौरवात् किं च देवदत्तेन पचतीत्यत्र प्रधानदेवदत्तस्यैवाभावः प्रतीयेत पूर्वप्रक्रान्तस्यान्यथानार्थ
सेव न तत्प्रयुज्यते न च विशेषणाभावप्रयुक्तो विशिष्टाभावो स्यैवेति वाच्यम् कृतिमत्ताद्देवदत्तादीनामभेदाद्देवदत्तत्वादि
नाप्यभावबोधः स्यात् यत्र अभावस्य विशेष्यतास्वीकारे नियमिकत्वाद्घटो नास्तीत्यनेन घटोऽस्तीत्यस्य प्रतिबन्धो न स्यादि
ति गदाधरभट्टाचार्यास्तन्न धर्मिणोऽधिकरणस्य समत्वात् अभावस्य विशेषणान्वयस्वीकारेऽपि व्यापारसमये फलस्यावि
द्यमानतादेवदत्तेन न पचति तडुतिस्यात् ननु व्यापारसमये तथैव तथैवेति चेन्न फलाभावसमयेऽपि फलस्याभावेऽन्वये स्या।

श्री॰
डरीं॰
वृ॰प॰
दी॰
२०

श्रयेऽन्वयाभावात्फलाश्रयवाचकताभावात्कर्मलकारानापत्तेः एवं कर्तृलकारेऽपि किंच पणिडतोनवर्तितेनपाठोन
जातइत्यत्रतत्त्वहेतुत्वेनपण्डितत्वेबोधः स्यात्तत्तभावस्य किंच मैत्रोदेवदत्तोयनीतिवदेवदत्तोभजतिपठतीतिस्यात् ननुय
कस्मादिश्यपेक्षेविधीयतेयथासुन्दरत्वविशिष्टदेवदत्तस्मादिश्यपनितिविधीयते तत्रचदेवदत्तशब्दाद्वितिप्रभृत्ययोरि
तुदेवदत्तः मैत्रोयनीवतत्रवकारेणदेवशब्दाद्देवदत्तनिरूपणस्यावैयाकरणमतेपिक्रियायाः प्राधान्यात्तत्रविशेषणद्वय
योगादेवदत्तोयज्ञदत्तः पचतीतिस्यात् तिङर्थकाश्रयबोधकत्वेपिप्रत्येकमुभयोरेकत्वात् एवंच भजतिपठतिचदेवद
त्तइतीष्टमेवेतिचेत्प्रथमस्तोयावतीत्यादौसुगस्यकर्मत्वाद्वितीयास्यात् नचवाकार्यस्यतत्रकर्मत्वात्तद्वितीयाप्राप्तिः
स्त्रणदेवदत्तोगायतीत्यादिवज्जलिदेवदत्तोयातीत्यादिवल्लभेवेतिवाच्यम् भवन्मतेसमुदायशक्तेरभावात् नच
समन्वयविशिष्टस्यकर्मत्वान्नद्वितीयाप्राप्तिः राज्ञः पुरुषमुपश्येतितद्वितीयोक्तत्वात्पुरुषसमन्वयबोधनेनेतिवाच्यम्
पूर्वंसमन्वयान्वयेद्वितीयानापत्तेः किंचक्रियाप्राधान्यास्वीकारेवसन्दर्शनत्यादौप्रधानक्रियामुक्ततनावरोपिलटोभूते
विधानेनस्यात् नचयासवतिनज्ञातस्यदर्शनाश्रयत्वादर्शनस्यप्राधान्यमतएव जलेपश्यन्कूपेपठितइत्यत्रति
ङन्ताभावेपिप्रधानयत्ननावरोपेनभूतेलडितिवाच्यम् उभयोः कर्तृविशेषणत्वेनप्रधानत्वासंभवात् यतितइत्या
दौतुपरस्परयाऽभूदित्याद्यवन्वयात्प्राधान्यमितिदिक् ननुपेचकेप्रातिपदिकार्थइतियदेतत्सर्वेषांप्रातिपदिकस्यैव २०

एवंधातोरप्युचितमतएवप्रत्ययंविनावाऽवार्यजयेत्यादौबोधः एवंनामपिप्रातिपदिकार्थतादेवकर्मणीद्वितीयेत्यादे
र्नियमार्थत्वंभाष्योक्तंसंगच्छते एवंचप्रत्ययार्थानिरूपणमसंगतमेवेतिचेन्न वाचकतापक्षेतत्संभवात् किंच द्योतक
तापक्षेऽपिकिंपदतोऽर्थस्यद्योतकइतिविचारसंभवात् किंच येषांप्रत्ययानामृषिणासाक्षादर्थः कथितस्तेषामस्यवाचकत्वमे
वयुक्तम् अतएवदरियान्यातिमिसइत्यादौप्रकृत्यभावेऽपिबोधः सिद्धान्तेसमुदायवाचकत्वस्वीकाराच्च नप्रातिपदिकार्थत्व
21 नियमः चरमवर्णस्यैवस्फोटाभिव्यञ्जकत्वपक्षेप्राप्तःप्रत्ययानामेववाचकत्वस्यौचित्याच्च प्राधान्याप्राधान्ययोस्तुननि
यमः अर्थस्याप्रमाणत्वादितिभगवत्पाणिन्युक्तेः प्रातिपदिकेनजातिव्यक्त्योरेवबोधनेनतयोरेवप्रातिपदिकार्थत्व
स्यौचित्याच्चभाष्योक्तोनियमस्तु हरिरादेजिवन्मालितार्थपरदतिशिवम् इतिश्रीमत्सारस्यपारितत्व्यानकात्मकुज्व
त्रिपाठिगोरक्षवंशोत्पन्नयोनिपिदेवोदत्तात्मजविपातपोविख्यातरामसेवकात्मजमहामहोपाध्यायश्रीमदाचार्यकृत्स्न
मिश्रात्मजलक्ष्मीदत्तविरचितःपदार्थदीपनामाग्रेयसेस्राणः समाप्तम् शुभंहरिः ॐ

व्याकरण

पदार्थदीपक